धर्म्मकृत्यं च यत्नतः कुरुते भुवं पण्डितनीतिशास्त्रज्ञानि

कृष्णखं०

७ दक्षिणायनमेवच माघाद्याषाढपर्य्यंतं दिनवृद्धिं क्रमेणवै ६२
नक्तवृद्धिं श्रावणादि पौषपर्य्यंतमेवच प्रतिपत्पूर्णिमांतश्च शु
क्लपक्षः प्रकीर्त्तितः ६४ पूर्णिमायाः प्रतिपदश्चामावास्यांतएवच
कृष्णपक्षस्तु विज्ञेयो वेदविद्भिर्निरूपितः ६५ द्वितीया च तृतीया
च चतुर्थी पंचमी तथा षष्ठी च सप्तमी चैव त्वष्टमी नवमी तथा ६६
दशम्येकादशी चापि द्वादशी च त्रयोदशी चतुर्दशी कुहूश्चैवदिनं
तु गगनं स्मृतं ६७ अश्विनी भरणी चापि कृत्तिका रोहिणी तथा

वैशाखो ज्येष्ठ आषाढः श्रावणो भाद्रपदश्च आश्विनः कार्त्तिको
मार्गः पौषो माघस्तु फाल्गुनः ॥ चैत्रस्तु वत्सरो ज्ञेयो वर्ष
कोषे निरूपितः ५८ वसंतश्चैत्रवैशाखो मासयुग्मेन कीर्त्ति
तः ज्येष्ठाषाढौ हि देवेनैव ग्रीष्मस्तु परिकीर्त्तितः ॥ वर्षा श्राव
णभाद्रौ चाश्विने कार्त्तिके शरत् मार्गे पौषे च हेमंतः शिशिरो
माघफाल्गुनौ ६१ अयनस्तु चायनेन द्वे वै चोत्तरे दक्षिणायने मा
घादिषट् परिमितं उत्तरायणमीप्सितं ६२ श्रावणादिमासषट्कं

कृ॰स्म॰ख॰ ५०

दंडद्वयेमुहूर्त्तस्त्वष्टिदंडात्मिकातिथिः तदष्टभागप्रहरः प्रमाणं
च निरूपितं ५३ चतुर्भिः प्रहरैरात्रिस्त्वनुर्भि दिनमेवच तिथिपंचद
शैनैवपक्षमाणं प्रकीर्त्तितं ५४ पक्षद्वयेनमासः स्याच्छुक्लकृष्णा
भिधेनच ऋतुर्मासद्वयेनैवततषड्भिर्नेववत्सरः ५५ वत्सरोग्नी
श्च वर्षाश्चप्रारब्धेमंतशैशिरं वर्षाः पंचविधाज्ञेयाः कालविद्भिर्निरूपि
ताः ५६ संवत्सरः परिवत्सर इदावत्सर एवच अनुवत्सरो वत्सरो एवमि
तिकालविदोविदुः ५७ अब्दोद्विषड्भिर्मासैस्तत्रनामानिशृणुपद्वजे

५१२

श्रीकृ॰ख॰ ३ वत्सरः २

रनूहं परमी विसतं ४७ चरमः सद्विशेषाणामनेको ऽसंयुतस्तथा
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ४८ परमाणुद्वयेना
णुस्त्रसरेणुस्तु तत्त्रयः त्रसरेणु त्रिकेनापि त्रुटिरुक्ता मनीषि
भिः ४९ वेधस्त्रुटिशतेनापि त्रिवेधेन लवस्तथा त्रिलवेन निमेष
श्च त्रिनिमेषेण च क्षणः ५० काष्ठा पंचक्षणेनैव लघुश्चदशकाष्ठ
या लघुपंचदशो दंडस्तत्प्रमाणं निशामय ५१ तादशार्धपलोन्मा
नं चतुर्भिश्चतुरंगुलैः स्वर्णमाषैः कृतच्छिद्रं पावत्प्रस्थजलप्लुतं ५२

सू० स्त्र०

५

वंधुर्विपदांश्री कृष्णेन विनाभुवि ४१ तस्मात्त्वंतं सदा कृष्णं भजंत्वे
वंदिवानिशं जन्ममृत्युजराव्याधिहरं सर्वपरात्परं ४२ कालस्यत
स्तोपायं भजनं परमात्मनः आनंदनंदनस्यैव परिपूर्णतमस्य च ४३
शृणु कालगतिं वत्स मदीयज्ञानगोचरं नराणां च पितॄणां च सुरा
णां चापि ब्रह्मणः ४४ नागानां राक्षसादीनां ततः परेषां च एतत्क कथ
यामि निगूढार्थं सावधानं निशामय ४५ सर्वस्माच्च परः स्थूलः सर्वा
धारो महान् विराट् यस्य लोमसु विश्वानि चासंख्यानि च तानि च ४६
सर्वस्माच्चेव सूक्ष्मं परमाणुं निशामय कालात्मकं सर्वस्मात्

५

गुनि १

सुचिरंजीविनः सिपंडैश्च मुनीन्द्रैश्च नरैः पन्नेश्च चोपद्रव ३६ हरिभा
वनभ्रष्टाश्च सर्वे ते चिरंजीविनः प्रह्लादं कश्यपं दैत्यं पुत्रं हिरण्यकशि
पोः सुतं हरिद्विषो रुक्मस्य हरिभावने तत्परं चिरायुषान् काल
जितान् ३७ कश्यपान्याश्चाप्य सर्वलोकान् ३८ अनेकजन्मतपसाल
ब्ध्वा जन्म च भारते ये हरिं ते न सेवंते ते मृताः कृतपापिनः ३९ वासु
देवं परित्यज्य विषये निरतो जनः त्यक्त्वामृतं महामूढो विषं भुंक्ते नि
जेच्छया ४० कस्य स्त्री कस्य वा पुत्रः कस्य वा बांधवास्तथा कः कस्य

सनत्कुमारश्चैवस्मरंतिचनित्यशः तीर्थस्नानफलंतस्यकृतपापा
त्प्रमुच्यते ३० हरिभक्तिर्भवेत्तेषांहरिदास्यंलभंतिते मृकंडोवील
कंपश्यकन्मिणाचद्विजोत्तम ३१ दशावर्षाणुषंतीवज्वलंतंज्वलते
जस्ता हरिसेवनतः पश्चात्सप्तकल्पातजीवनं ३२ वोढुंपंचशिरव
पश्यलोमशश्चाशुरितथा सर्वकर्मविहीनंचहरिसेवनतत्
परं ३३ शतकल्पायुषंचैवध्यायमानेहरेःपदं जमदग्नेःसुतंप
श्यरामंतंचिरजीविनं ३४ हनुमंतंबलिंव्यासमश्वत्थामानमेवच
विभीषणंकृपंविप्रंजांबवंतंचभल्लुकं ३५ हरिभावनयाचैतेकुंभः ४

त्यानज्ञानिनांचगुरोर्गुरून् २५ बालान्वैनुपवीतांश्च पंच
वर्षत्रिवर्षान्तथा अभ्यंतरान्महास्फीतान्सस्मितांश्च दि
गंबरान् २६ श्रीकृष्णध्यानपूतांश्च वैष्णवान्वेदपारगान्
वेदवेदांगशास्त्राणां चिंताहीनान्प्रफुल्लितान् २७ भक्त्या
दिवानिशं शश्वत्पद्मरिभावनतत्परान् व्रात्यपूजाविहीनांश्च
पूजामानसिकास्तथा २८ मृत्युंजयान्महाभागान्काल
व्यालजितांस्तथा सनकंचसनंदंचतृतीयं चसनातनं परं
२९

कामिनि ध्यायमप २० राधोवाच भजेतिजगतांनाथं कालकाले
२
जगद्गुरुं निर्गुणं चनिरीहं च परमात्मानमीश्वरं २१ सर्वःप
ततिदेहो येविनायेनसदात्मना ॥ अनिर्वाच्यकालगतिमंवत्सेवहि
तं
केवलं २२ तं निर्वाच्यकालगतिं तरंत्येवहिकेवलं आगुहरंतिस
र्वेषां प्राणिनां रविरेवसः २३ श्रीहरेःशुद्धभक्तानां सततांपुण्यपर
तांविना विघ्नेमानसिकान्पुत्रान्चतुरः पद्मपुत्रक २४ सन
कादीन्भागवतान्येषां चहेतुस्थिरंवपः कृष्णध्यानवपस्तानि
३

स्त्रीजातिरवलालोलाकिंवाहंजानेंवदामिते १५ शुभ्रांकालगतिंवत्स
जानातिभगवान्हरिः ब्रह्मामहेशःशेषश्चवेदाश्चत्वारएवच १६
किंचिद्विदन्तुसारंसंतोजानंतिपुत्रक श्रुतपूर्वं कृष्णवक्त्रेणगोलो
केरासमंडले १७ गोलोकेचापिवैकुंठेब्रह्मलोकेचवांछित पाश्च
र्ष्याकालगतिस्तामेवकथयामिते १८ नृणांपितॄणांदेवानांब्रह्मलो
कादिकस्यच वहिर्लोकस्यब्रह्मांडतत्पातालानांचनिश्चितं १९
दुरत्ययांकालगतिंकेनोपायेनपंडिताः निस्तरंतिबुधश्रेष्ठकथ

तस्यप्तमातामहादिकान् सोदरान्नु पधेऽग्रजान् तान्प्रसंत्व चप्रसूतं तथा ३७
मंत्रग्रहणमात्रेण फलमेतद्द्विजेश्वर पुरश्चरणे संपकीत गुरुवाक्यं
शतं शतं ३८ जपेन्न्यासापणे त्रेपुरश्चरणापूर्वकं गुरुवाक्यं सहस्रं
च लीलयात्मानमुद्धरेत् ३९ एकोंतिकोवैष्णवश्च पुंसां लक्षं समुद्धरेत्
श्व
किं पुनर्विष्णुपदे पस्य संकल्पोत्र वहिष्कृताः ४० द्विजाः स्वरां मम प्रा
णा भक्तः प्राणात् परः प्रियः तेजोयां सं गुरुं दृष्ट्वा सर्वज्वरक्षितुं क्षमं
मः ४१
करोति मंत्रग्रहणं तस्मात् पृष्ठो विचक्षणाः वर्णहीनात् ज्ञानहीना

द्विघाहीनात्तथैव च ४२ जातिहीनाद्गुरोर्म्मंत्रं न गृह्णीयात्कदाचन
५ ग्रन्थार्थाद्व्यार्थज्ञातमंत्रं न गृह्णीयात्कदाचन ४३ मूर्खान्नाक्रमहीना
च्चपितुः संन्यासिनस्तथा व्याधिनो वंशहीनाद्वा भार्य्याहीनात्त
थैव च ४४ मंत्रं स्त्रियास्तथा मंत्रं न गृह्णीयात्कदापि च विष्णुमं
त्रं न गृह्णीयाद्विष्णुभक्तिविहीनतः ४५ न च शैवान्न शाक्ताद्वा गृ
ह्णीयाद्वैष्णवाद्द्विजात् वेदहीनात्तथा त्याज्यात्पुत्रहीनहीनादपंडितः
४६ विद्याहीनाद्भवेन्मूढो जातिहीनात् क्षपणो भवेत् मूर्खान्मूर्खो भवेत् ५

स्वा

सुघो दुःखी चांगमहीनतः नष्टो हानिः पितुश्चैव मृत्युः

संन्यासहीनस्तथा व्याधिनो व्याधियुक्ताश्च निर्वंशोव

गृहीनतः भार्याहीनोपि स्त्रीहीनात मेवहीना गुरोः स

मः विष्णुभक्तिविहीनाश्च भक्तिहीनो भवेन्नरः सेवान

शास्त्राङ्गृहीत्वा च हरौ भक्तिर्न्निवर्धते ब्राह्मणो वेदमेवं

शुद्धः एकान्तं दानमीश्वरः एकान्तं हरदेवतानुपद्मम

श्वेतो जनः लंकारे चारणो नौमा चश्लोल नामाष्टा

६ ल्लार्द्धनात् मत्स्यपक्वान्नदानाद्विप्रादन्यो व्रजेदधः ३ दासी
नाद्दुराचारादन्नेन गृह्णीयात्सुधीः दैवाद्यदि च गृह्णीयात्प्र
नष्टो नो भवेद्ध्रुवं बालत्वान्नासदा भक्ष्यं हविष्यं वा निरामिषं
ऽत्रामिषस्य परित्यागात्सूर्यवत्तेजसा भवेत् नित्यं नूतनभां
डेन कर्त्तव्यः पाक एव च ऽप्रयत्नापक्वपर्व्वितं तत्तत्याज्यमनी
षिभिः स्थानं तु संस्कृतं कृत्वा पाकं निर्वर्त्य पूर्वकं स्थाने प
रिस्कृते विप्रो दत्वा मत्स्यं च भक्तितः ततो निवेद्य भुंक्ते च दत्वा ६

द्विज०

विप्रान्समादरं अनिवेषच भुक्त्वा च तु पीतिमवेन्नरः चंद्र
सूर्योपरागे वै चाशौचे मृतजातयोः स्पृष्ट्वा चाशुचिना सद्यः
पाकभांडं परित्यजेत् अस्पृश्यं तथान्नं च धृत्वा धौते च वास
सी पादप्रक्षालनं कृत्वा भुक्ते स्थाने परिष्कृते द्विभोजनेन
तीर्थं स्थिते सूर्ये द्विजातिभिः निष्फलं तद्भवेत्कामं भुक्त्वा
नरकं व्रजेत् पात्रात्पृथं न दद्यात् पुनर्भोजनमैथुने वर्ज्ये
द्वादशी दिवसे हविष्याशी च तपसे द्विजादीनां भक्त्या

दानं चान्नं क...

८ नपात्रं दद्यात् द्विधापि च वृषलीपतये चैव न दद्यात् कदाचन पूर्वं
संध्याहीनाय दुष्टाय वृषवाहाय पतिताय शूद्रकविक्रयिणे चै
व देवलाय कदाचन प्रदत्वा पात्रमेतेभ्यो बालतो नरकं व्रजे
त् पात्रं भुक्त्वा तद्दिवसे मैथुनान्नरकं व्रजेत् सर्वेभ्यः पातकी
तातकन्याविक्रयकारकः मूल्यं गृहीत्वा यो दद्यात्स महा
रौरवं व्रजेत् कन्यालोमप्रमाणं तद्वर्षं च पितृभिः सह कुंभी
पाके तु संयाते पुत्रेण्यापि पुरोहितैः तस्मात् कन्यां सुपात्राय

८

अथातः संप्रवक्ष्यामि सैन्यानां च चलाचलं ॥ येन विज्ञा-
नमात्रेण दैवज्ञो नृपवल्लभः ॥ १ ॥ तिथिवारं च नक्ष-
त्रं मुहूर्त्तं च काव्य शोभितं ॥ एकं युग्मं १ २ ३ स्थिते तत्र सै-
न्ये नैव चलाचलं ॥ २ ॥ त्रिशो बेदारूराणुद्धज्ञापते
न च संशयः ॥ तुर्ये ४ तुरगमारूह्य लपानं तु करोति तत् ।
॥ ३ ॥ पंचमे पुनरावर्त्ति षष्ठे श्रीगमनं वदेत् ॥ शैले ७
हारे प्रबधिसेव नगरे न च गम्यते ॥ ४ ॥ रुन्ये च
ग हते नामे मिस्पतं सर्वदा वदेत् ॥ इति सैन्यानां च
लाचलं ॥ अथान्यच्च ॥ तिथिपंचगुरगा काढ्या
मादौ मितिसंयुतं ॥ सप्तभिस्तु हरेद्भागं शेषं चै-
व फलं वदेत् ॥ १ ॥ शयनं चैकशेषे च द्वितीये चोप-
वेशनं ॥ तृतीये भोगसंयुक्तं पत्रकांतासमन्वि-
तं ॥ २ ॥ तुरगारोहणं तुर्ये ४ शेषे चापांतरं स्मरेत् ॥ प-
ष्ठे च तस्मतीरे स्यात् सप्तमे मूर्ति वदेत् ॥ ३ ॥
इति रिपुशयनं ॥ अथान्यच्च ॥ तिथिवारं च नक्ष-
त्रं नामाक्षरसमन्वितं ॥ शिवनेत्र हरेद्भागं शे-
षं फलमुच्यते ॥ एके १ जीवं द्विके २ मृत्युस्तन्ये
नवं चतुःपापे ॥ दस्रादिसप्तके वान ७ जुष्यव
रके पुरांतके ६ चित्रादिसप्तके तोय ७ द्वितीयं वैर
वनुधनं ४ लोहत्वयंति मार्गेषु पूर्वं भाद्रपद
त्रेयो ।

पंसर्वदावुधैः॥८॥ देवता मनुजाश्चैव पक्षिणो गा[illegible] स्तथा॥ चतुर्भिरेव ज्ञातव्या भाजितः
शेषतः क्रमात्॥९॥ मीरः शुष्मास्तथाम ध्यादीर्घ मध्यश्च ह्रस्वकाः॥ शिष्टं पूर्ववत्तथा[illegible]
भिर्भक्ते भि जायते॥११॥ नरास्तु योचद्विविधौ च त्वारश्च क्रमादिमे॥ भक्ते द्वादशभिश्चैव भा
मसंबंधिचिंतनम्॥१२॥ अन्यव्यक्ति भवेन्नेदो नास्माभिश्च प्रकथ्यते॥ ग्रंथवाहुल्यभी
त्याच ज्ञेयमन्यत्र तः सदा॥१३॥ मूलभेदा न्स्त्रवक्ष्यामि पथ्यो [illegible] भुना धुना॥ मूलं काष्ठं त
चो पत्रं पुष्पं चैव तथा फलम्॥१४॥ षड्भिर्भक्ते [illegible] जानीयात्पूर्ववि धाविचक्षणैः॥ तरवश्च
लतोषध्यस्तृणगुल्मादिकं तथा॥१५॥ पूर्ववन्मादृतथा वाभ्यां भक्त्वा मह्यां [illegible] च॥ स्व
देशे वपरे देशे वा प्रकल्पाभिर्विचिंतयेत्॥१६॥ कालसंघोत संख्या प्रकीर्णं चिंतये बुधः॥
एकेन रत्नजाति श्चतन्नो भेदादिकं पुनः॥१७॥ प[illegible] क्रमविभागेन मूलभिश्रणावेत
था॥ इत्येवं बहुधा चिंतं प्रश्नकालेमनोषिभिः॥१८॥ [illegible]

प्र॰ म॰ १

[illegible] प्रत्ताभ्यानंद[illegible]
श्रीगणेशाय नमः॥ [illegible] स्यान्माभिधास्ते॥ [illegible] सहितं भिषः॥ पिण्डसंज्ञा
मतां प्रीत्यै प्रश्न विद्यामथाकरोत्॥१॥ वर्गवर्गाप्रिमा [illegible] भाला भौवधा क्रमम्॥
मनां[illegible] विद्यामथाकरोत्॥ [illegible] केम्ना॥२॥ सि[illegible] सिद्धं क्रमाद्भुमोला [illegible] क्रमान्नरनारी
भवेत्तस्य पथा भागोश्च कल्पना॥३॥ गर्भे त्रिभिः [illegible] क्रमाद् [illegible] नरनारी
द्विगुणानमष्ट भिर्भक्ते शेषतः परिकल्पयेत्॥४॥ धातुमूलं तथा जीवं मूलं
नपुंसकम्॥ लोकज्ञाने पिचैतत्कालज्ञाने यथाक्रमात्॥५॥ धपुमे दान्स्त्रवद
जीवंच धातुकम्॥ कालक्रमाद्गुणा [illegible] प्रश्नकोविदैः॥६॥ सीसंजसं
भिपिण्डस्य [illegible] शेषतः॥ स्वर्णं [illegible] तथा ताम्रं तारकं कांस्यपिंगलं॥७॥
तथा [illegible] लोहाभूक्रमधोपिवा॥ तत्र द्वादश[illegible] कालांशक्रमतो वदेत्॥
[illegible] संज्ञानं त्रिभिरेवा प्रभाजितम्॥ नानानकं तथा पत्रविज्ञेयं सर्वदा
[illegible] पद्मतुष्पद श्चैव विपदः पादसंकुलाः॥ चतुर्भिर्भाजिते शेषे विज्ञे
बुधैः॥८॥ द्विपदश्चतुष्पद श्चैव विपदः

राम:
१

प्र० २

मेदस्तथा वसा ॥ एवं जीवे विचार्यस्या [illegible] जीवितं मृतमेव च ॥ १९ ॥ [illegible] नाम समायुक्ते पापी
स्यापीयथा [illegible] मम ॥ शृन्वेसं [illegible] यः समाहे [illegible] कालेन सम्भाष ॥ २० ॥ इत्येवमेक
विंश [illegible] ङ्गः श्लोकैर्लोकमनोरमा ॥ प्रसिद्धा [illegible] मपाप्रेमादेपाशिष्या [illegible] साधवे ॥ २१
ऽर्जा चाविशेषेराऽजेप्यनूने मूलोके [illegible] पूततथा बुधे ॥ स्वान [illegible] सा विशे
रामो हन्नेन विचार्यतः ॥ २२ ॥ इति श्री प्रश्नमनोरमा समाप्ता ॥ पौषमासि
सिते पक्षे दशम्यां भृगुवासरे ॥ सम्वत्सरे वेद गोत्र वसु चन्द्रे लिखित
मिदं पुस्तकं वाराणस्यां मुकुन्देन ॥ छ ॥

१८७४

अ१ आ२ इ३ ई४ उ५ ऊ६ ऋ७ ॠ८ ऌ९ ॡ१० ए११ ऐ१२ ओ१३ औ१४ अं१५ अः१६ १७
क३ ख४ ग५ घ६ ङ७ च४ छ५ ज६ झ७ ञ८ ट५ ठ६ ड७ ढ८ ण९ त६ थ७ द८ ध९ न१०
प७ फ८ ब९ भ१० म११ य८ र९ ल१० व११ श९ ष१० स११ ह१२ क्ष१३ २५ चं२९ मं१४ बु२५ [illegible] ३३ श११
अ१ क२ च३ ट४ त५ प६ य७ श८

राम: २

श्रीगणेशाय नमः ॥ ॐ ह्रीं वाग्वादिनी स्वाहा । ॐ ऐं ह्रीं वद वद वाग्वादिनी स्वाहा । ॐ सिद्धिः ॐ गं इति मंत्रत्रयेण पूगीफलपं
चकानां मध्ये पूर्वस्थं कुरु । पुनः पंचकं द्वितीये पूगीफलानां स्थापयेत् । उभयोरेकमेलने कृते सति यदि एकादशं भव
ति । तदा भो पृच्छक अग्रे धारयन् तव वांछितार्थो भवति न संदेहः ॥ स्थानांतरे गतो विदेशात् कार्यं कृत्वा समागमिष्यति ।
कार्यसिद्धिः गुर्विणी पुत्रं प्रसूयते रोगिणां रोगनाशः कृषिवाणिज्ये सिद्धिः ॥१॥ अंके मेलने यदा द्वादशं भवति ।
१२ तदा भो पृच्छक भू स्थाने स्थित्वा कार्यं कु

१	२	३	४	५	सीताराम
१	२	३	४	५	हनूमान

यतो त्वदीयं कार्यं यथास्वरूपं दीपं प्रकरोति तथैव किंचि
रु विलंबात् कार्यसिद्धिः ॥२॥ अंके १३ तदा भो पृच्छक मू
यतां त्वदीयं कार्यं समागमिष्यति । विपदादी[illegible]नां नाशः ॥३॥ अंके १४ राज्यात् कार्यसिद्धिः गुर्विणी पु[illegible]प
ते व्यापारे वृद्धिः विवादे जयः चिंतितकार्यसिद्धिः शत्रुभयादीनां नाशः ॥४॥ अंके १५ । भो [illegible] के त्वदीयकार्ये
ऋद्धि धनधान्यादीनां प्राप्तिः । व्यापारे समस्तकार्यसिद्धिः संशयं मा कुरु सोत्साहयुक्तो भव [illegible] । अंके भो पृच्छक
त्वयि चिंतितोऽयं नादेयात् कार्यसिद्धिर्भविष्यति [illegible] समस्त [illegible] वृद्धिः मंगलं समस्तकार्ये जयः ॥६॥ १६ ।
अंके २१ भो पृच्छक [illegible] कार्ये भयं स्वबाहुबलात् कार्यसिद्धिः ॥७॥ [illegible] अंके २२ तदा भो पृच्छक [illegible] न पुत्रो स्त्रीणां का
र्यं पूर्वं [illegible] कस्तस्य विध्वंसः सर्वान् [illegible] कार्यं कुरु । कार्यसिद्धिः संदेहं मा कुरु ॥८॥ अंके २३ भो पृच्छक त्वत्
यं सर्वविघ्नवर्जितं कंचित्कालं [illegible] मङ्गलं भवति । पुनः सर्वसिद्धिः [illegible] पुत्रलाभो [illegible]

राम:

ॐकं ३४ तदा भो पृच्छक स्वरूपतां मांगल्य मखिलं कुलेषु गमनागमनं सेवया राजसेवया सुविदारज असंयोगे शुभं सर्वग्रहं दृश्यते ॥१०॥
ॐकं २४ भो पृच्छक तव मनोर्थ ... संति कार्यसिद्धिर्भविष्यति संशयं मा कुरु पूर्वे ... सान कर्तव्यः स्वबाहुबलात् कार्यसिद्धिः ॥११॥
ॐकं ३१ भो पृच्छक गमनागमने कार्यसिद्धिः गर्भे पुत्रसंभवः व्यापारे प्राप्तिः संग्रहे लाभः विवादे द्रव्यं फलं गृहे कार्ये कृषिका
र्ये माहिष्यादि कार्ये लाभः समस्तकार्ये जयः धनादि वृद्धिः ॥१२॥ ॐकं ३२ भो पृच्छक तव निष्ठा कार्ये सफलं द्रव्य प्राप्तिः ॥
मित्रपक्षे जयः गर्भे पुत्रप्राप्तिः समस्तकार्ये जयः समस्त विपक्षान् जित्वा कार्यं भविष्यति संशयं मा कुरु पूर्वदिशायां सिद्धिः
कार्यसिद्धिः ॥१३॥ ॐकं ३३ भो पृच्छक तव कार्यं मया न दृश्यते न कर्तव्यादि दृष्टा क्षिप्तेन तदा कुशः शरीरे विघ्नो भवति अन्यत्र च
पदुर्वा वहवः संति पश्चात् नापो भविष्यति तस्मात् किंचित्कालं धैर्यमवलंब्य विधेयं ॥१४॥ ॐकं ३४ तदा भो पृच्छक यत्किंचि
त्कार्यं करोति विमलं चेतः स्थरं त्वत्प्रसादेन कार्यं भविष्यति संशयं मा कुरु प्रमादं त्यज उद्यमपरो भव नात्र संदेहः गर्भे पुत्रो
स्ति कृषि वाणिज्ये जयः ॥१५॥ ॐकं ३४ भो पृच्छक अस्मिन्कार्ये नोद्यमः अन्य कार्यं प्रारंभे जयः स्वकीय परपक्षे वादि वृद्धि विप
न्नादीनां नाशः किंचित्कालं धैर्यमवलंब्यातां सहसा कार्यसिद्धिः ॥१६॥ ॐकं ४१ भो पृच्छक तव कार्यं द्विराम एव भविष्यति शी
घ्रं प्राप्नोति देवादीन् विलयः समस्तकार्ये जयः शत्रुनाशः कार्यप्रारंभं कुरु गर्भे पुत्रसंभवः ॥१७॥ ॐकं ४२ तव कार्यं सिंह
वत् यथा चतुष्पदानां मध्ये सिंहः श्रेष्ठः तथा सर्वकार्यं भविष्यति ॥१८॥ ॐकं ४३ तदा भो पृच्छक तव कार्ये विविध मोप
मं दृश्यते सर्पमणिवत् यदा सर्पो हन्यते तदा मरणं प्राप्तिः पश्चात् तस्मात् कार्यारंभे विश्वासो न विधेयः उद्यमे पिनासि

पा०के०
२

कं २१ द्विकानित्रीनिदृश्यंते २२२ विरोधं विघ्ननाशनं चित्तक्लेशमसौख्यं च उद्योगं का
र्यनाशनं २२ द्विद्विकां नेत्रयंबीद्वयं २२३ कार्यसिद्धिकरं हं शंका स्वलाभं स्थान लाभं बं
धुमित्रसमागमं २३ द्विद्विके च चतुष्कांके २२४ गमने कार्यनाशनं विरोधं ग्रहदोषं च
कलहं मित्रबांधवै २४ द्विकं त्रिकं पंचांते २२२ ग्रहीतं दृश्यते गृहे कार्यनाशं च धं व्याधिः
ग्रहदोषविरोधता २५ द्विकं त्रिकं द्विकं चांते २३२ वीक्षते गमनं षण्मं आगमं छेला
भं च धनधान्यं षण्मुखं फलं २६ द्विकाद्वौ त्रीन् चौ चांते २३३ शत्रुव्याधिविनाशनं धन
धान्यागमं क्षेमं स्थानलाभं च नः वदं २७ द्विकं त्रिकं चतुष्कांते २३४ चिंता दोषविरोधता
शत्रूणां संगमं दृष्टं राज्यदोषं च दारुणं २८ द्विकं चतुष्कं च पं २४१ दृश्यते गृहदूषणं
हानि राजगृहे कष्टं षण्मुखं चित्ततो भयं २९ द्विकं चतुष्कं चाद्विकं २४२ कार्यहानिमहा
भयं चिंता कष्टं महाक्लेशं यक्षादि रोग्य संपदा ३० द्विकं चतुष्कं चत्रिके २४३ चिंता हा

राम
२

पा०के०
१

श्रीगणेशाय नमः ॥ अथ मंत्र ॥ ॐ नमो भगवति कूष्मांडिनि सर्वकार्यप्रसाधिनि सर्वनिमित्तप्रकाशि
नि एहि एहि त्वर त्वर वरदे वरदे हिलि हिलि मातंगिनि सत्यं ब्रूहि सत्यं ब्रूहि स्वाहा १ ददं ददं ददं चैव १११
पतते वह्निकुलं संतानं समृद्धिश्चैव राज्यमान्यमरोगता १ ददं ददं द्विकं यत्र ११२ पतितेसौ च
परं वध्वागमे जयं क्षेमं धनस्यागमनं भवेत् २ ददं ददं त्रिकं कानि ११३ पतिते स्त तसंगमं गते
प्राप्ति तीर्थयात्रा महोत्सवस्तु भवेत् ३ ददं ददं चतुष्कं के ११४ पतिते निरोकं कलहं गोत्र
जैराज्य भिमानं शत्रुसंकटं ४ ददं [illegible] कं ददं यत्र १२१ पतिते स्थानतः [illegible] लाभं [illegible] भवेन
गमागम तथैव च ५ ददा हौ द्विकं चांते १२२ पतिते भयतुल्यगुणं नाशानं च विज्ञानं स्वस्थाने
मं जयं भवेत् ६ मध्ये द्विकं ददं चांते १२३ त्रिकांते पतिते जयं कल्याणं क्षेममारोग्यं पुत्रदाराग
मागमं ७ ददं द्विकं चतुष्कं च १२४ तीर्थयात्रा महोत्सवं विवाहादि समुत्साहं गुरुराजास
मागमं ८ ददं त्रिकं ददं यत्र १३१ सामान्यं स्तोकलाभं च अभिमानकुले क्षेमं धनलाभय
सोनमं ९ ददं त्रिकं द्विकं कानि १३२ पतिते एकारकं [illegible] गोचितनाशं करस्य
ते १० ददा हौ त्रिकं चांते १३३ सामान्यं च [illegible] निद्रा [illegible] यामने १२

पाम
१

पदंत्रिकंचतुष्कंच १२४ [illegible] नं धनपुत्रादिलाभं [illegible] लाभं स[illegible]वच २२ पदंचतु
ष्कंचपदं १४२ भयवार्त्तासमागम [illegible] छत्रभंगराज्यनाशं प्रजाभंगप्रजायते २३ पदंचतुष्कं
चद्विकं १४२ धनधान्यसमागमं प्रजाधेमसुमित्रं च वस्तुवृष्टिं तु [illegible] १४ पदंचतुष्कं
चत्रिकं १४३ देशभंगमहद्दुःखं मतिनाशंमहाकष्टं पराजयः सदेहं च २५ पदौ [illegible] चतुष्कौ
च २४४ रिपुनाशंधनागमं आरोग्यंपितृसंयोगंराज्यसन्मानतोभवेत् २६ [illegible]
द्विपदौचांते २११ कार्यसिद्धधनागमं संतोषाद्विगुणंलाभं रोगनाशंशुभंकरं २७ द्विकं
पदंद्विकंपत्र २१२ क्लेशंहानिसरोगता बंधमृत्योगकलहं चिंतितंविफलंभवेत् २८ द्विकं
पदंत्रिकंपात्र २१३ गमनंकार्यशोभनं स्त्रीपुत्रधनसंप्राप्ति चिंतितंसफलंभवेत् २९
द्विकंपदंचतुष्कंच २१४ पुष्पं [illegible] दृश्यते कार्यनाशस्ततोद्वेगं सौभाग्यंसकलंशुभं
३० द्विद्विकेचपदंचांते २२१ एकचित्तेनसिध्यति विरोधनैवकुर्वीत मित्रप्रीतिततोसु

॥श्रीगणेशाय नमः॥ अकारे विजयं विद्यात् धनमैश्वर्य्यमेव च॥ अर्थश्रीपुत्रलाभश्च शोभनं चैव जायते १ ॥आ कारे सर्वसंतापं विरोधं स
र्वबंधुभिः ॥भयातङ्कभयं क्षिप्रं व्याधिश्चैव न संशयः २ इकारे धनमैश्वर्यं सिद्धिश्चैव प्रजायते सिध्यंति सर्वकार्याणि शिष्टानां च समा
गमम् ३ ईकारे धनमैश्वर्यं लाभश्चैव प्रजायते ॥धने नागमनं सिद्धिः सौभाग्यं च भवेन्महत् ४ उकारे दुःसंतापं विघ्नं चैव भयं विद्या
ति दुःखं च जायते घोरं मृत्युश्चैव न संशयः ५ ऊकारे प्राप्यते स्थानं प्रतिष्ठा चैव शोभना सिध्यंति सर्वकार्याणि ऊकारेण न संशयः ६ ॥
ऋकारे प्राप्यते द्रव्यं नानारत्नसमुद्भवम् सिध्यंति सर्वकार्याणि ऋकारेण न संशयः ७ ॥ऋकारे दृश्यते यच्च बाल्यमेव च मित्रै
स्सह विरोधश्च जायते च महाभयम् ८ लृकारे दृश्यते सिद्धिर्मित्रैस्सह समागमम् ॥अचिरेण च कल्याणं राज्यं सन्मानमेव च ९
ॡकारे शमहा व्याधिश्चिन्ता वैरस्य मेव च शोकं च जायते क्षिप्रं मृत्युर्हानिश्च जायते १० एकारे दृश्यते सिद्धिर्मित्रैस्सह समागमम्
उपस्थितं कल्याणं स्याच्चैव शुभं भवेत् ११ ऐकारे धनहानिश्च विरोधं सह बंधवैः ॥अमित्राणि च दृश्यंते भयं चैव न संशयः १२
॥ओकारे सर्वहानिश्च सिद्धिः क्षिपि न दृश्यते ॥अमित्राणि च जायंते शोकसंतापमेव च १३ ॥औकारे सर्वसिद्धिश्च भयं संताप
हारिणी सौभाग्यं चैव लाभं तु मित्रैस्सह समागमम् १४ ॥अंकारे विजयं लाभं राज्यसन्मानमेव च सिध्यंति सर्वकार्याणि
॥अंकारेण न संशयः १५ ॥अः कारे भयहानिश्च पापव्याधिसमन्वितः मित्रैस्सह विरोधाणि द्रव्यहानिश्च जायते १६ ककारेण
राज्यसन्मानं लाभश्च प्रियदर्शनं कल्याणं चैव सर्वं ककारेण न संशयः १७ खकारे शोक संतापं व्यथनाशं तथैव च सर्वत्र जाय
ते व्याधिर्जीवस्यापि न संशयः १८ गकारे चिंतितार्थश्च कार्यसिद्धिश्च जायते सौभाग्यानि लभ्यंते मित्रैस्सह समागमम् १९
घकारे सर्वसिद्धिश्च लाभश्चैव प्रजायते शोभनं यशो भवनं चैव कल्याणं च न संशयः २० ङकारे शोकसंतापं भयं व्याधिर्निरो
कं दृश्यते द्रव्यहानिश्च चिंतितं निःफलं भवेत् २१ चकारे विजयं लाभः राज्यसन्मानमेव च सर्वक्षेमं च ॥आरोग्यं सर्वलाभो

टिका ४

खकारे ॥ पर्थलाभश्च लाभानि विविधानि च ॥ पारोग्यं सर्वदा देहे शुभं चैव न संशयः २३ जकारे दृश्यते हानिः कार्यं क्षेव
नासिध्यति मित्रैस्सह विरोधश्च कलहश्चैव भविष्यति २४ झकारे दृश्यते चार्थं भावलं भोजनं भयेत सौंदर्यं दीर्घमा
युश्च धनलाभो भवेद्ध्रुवं २५ ञकारे संशयोद्दुःखं शोकं वंधनमेवच ॥ पश्चमं स्त्रशुभं चैव काय क्लेशश्च सर्वदा २६ टकारे
चार्थना शायविघ्नं चैव सदा भवेत प्राप्नोति शोदःखं च भवे सर्वत्र निःफले २७ ठकारे प्राप्यते पुत्रं राज्यं
श्रीमन् मेवचं इप्सितं फलं प्राप्ति ठकारेणा न संशयः २८ डकारे दृश्यते लाभो दीर्घमायुस्तथैव च ॥ प्र
विद्रोदे मारोग्यं ऽकारेणा न संशयः २९ ढकारे विविधा चिंता शोकं धनमेवच विदेशगमनं चैव ढकारेणा
नशंसयः ३० णकारे च सदा चैव धनं चैव भविष्यति विपुलं लभ्यते भोग्यं णकारे न संशयः ३१ तकारे दीर्घ
मायुश्च दोसं चैव वर्तते सर्वसौभाग्यमाप्नोति तकारेणा न संशयः ३२ थकारे कार्यसिद्धिश्च विविधं फलं
मेवच प्राप्नोति सर्वकार्यं च सदेव तथेप्सितं ३३ दकारे भोगानि कीर्तिरर्थं गुप्तदा भवेत सततं प्राप्यते

य	ल	श	ह	के	॥ यै	॥ प
शा	र	त	ऽ	ख	प	॥ सा
स	न	थ	ह	ग	हे	इ स
द	म	र	ब	ए	ई	ह घ
भ	अ	ऽ	लृ	ऽ	ने	न य
फ	च	लृ	ड	प	ज	व
॥	॥	॥	॥			

शोकं विविधानि च ३४ धकारेणा धनमस्वध्येश शरीरारोग्यमेवच प्राप्यते च महासौख्यमचिरेणा न संशयः ३५ नका
रेभयं नस्ति धनकार्यं भविष्यति दुःखं च भैवोत्किंचिन्नकारेणा संशयः ३६ पकारे चार्थनाशं वधनायतथैवच वि
छंसततं चैव शोकं वंधनमेवच ३७ फकारे दृश्यते धान्यं धनं चैव न संशयः फलंति कृषिसंपन्नं फकारेणा न संशयः ३८ व
कारेणा वनं क्लेशः ॥ पर्थनाशं महद्भयं प्राप्यते भरसा चैव वकारेण न संशय ३९ भकारे दृश्यते लाभं मनसंभोऽयुं तथैव च सिध्यं
ति सर्वकार्याणि भकारेणा न संशयः ४० मकारेणा वंधनं क्लिष्टमापदा सततं भवेत मरणं चार्थहानिश्च कार्यं चैव निःफलं ४१
यकारे कीर्तिमाप्नोति नि[illegible] धनसंपदा दाताचसवड्‌श्रेयं भोऽयं च भविष्यति ४२ रकारेणा भयं विघातिद [illegible] नित्यशः निश्च

येशानिशोकं नमस्यांचविनिर्दिशेत ४३ लकारेदृश्यतेसिद्धिर्धनंधान्यंचनित्यशः विपुलंलभ्यतेभोगंसुखंचैवनसंशयः ४४
वकारेविहितंकार्य्यंएसर्वांममैवच यथाचिंतितंकार्य्यंतथैवचभविष्यति ४५ शकारेविहितंकार्य्यंसफलंतुभवेद्ध्रुवं अर्थला
भमविघ्नंचसफलंचभविष्यति ४६ षकारेसर्वअर्थंचधनधान्यंतथैव सफलंदृश्यतेचिंतासर्वदानात्रसंशयः ४७ सका
रेनिःफलंचिंताभयशोकसदाभवेत यंयंचिंतयतेकार्य्यंनिष्फलंसदाभवेत ४८ हकारेसर्वसौख्यंकार्य्यसिद्धजायते
तस्मात्कार्य्यंकर्तव्यंसफलंभविष्यति ४९ क्षकारेराज्यसन्मानंसर्वसौख्यप्रजायते अर्थलाभंभवेतस्यक्षकारेना
त्रसंशयः ५० इतिश्रीपंडमाशिवसंवादेशकुनप्रश्नकशभाषासमाप्तं संवत १८७४ लिखितंद्विवेचंदीपुस्तकंसमाप्तं ध ६
[illegible]पूछे ।। मेषलग्नेकुंतापूछे सहदेवकहै वांछितफलहोइ ।।१।। वृषलग्नेशक्तिपूछे कृपाचार्यकहे अर्थलाभहोइ ।।२।। मिथुनल
ग्नेइंद्रपूछे विश्वामित्रकहे गांठीकोजाई ।।३ कर्कलग्नेद्रुपदपूछे नलधौम्यकहे लाभसुखहोइ ।।४।। सिंहलग्नेत्रिपुरारि
प्रतिपूछे सहदेवकहे वैरीसोभेटहोइ ।।५।। कन्यालग्नेकालिकाप्रतिपूछे भगदंतकहे लाभहोइ ।।६।। तुलालग्नेअश्व
त्थामाप्रतिपूछे द्रोणाचार्यकहे लाभफलहोइ ।।७।। वृश्चिकलग्नेगौतमप्रतिपूछे कविकहै कार्यसिद्धिः ।।८।। धनल
ग्नेशिवपूछे गणेशकहे प्रातःकार्यसिद्धिहोइ ।।९ मकरलग्नेविश्वामित्रपूछे नंदीकहेगांठीकोजाई ।।१०।। कुंभ
लग्नेकृपाचार्यपूछे दुर्योधनकहे मनवांछितफलहोई ।।११।। मीनलग्नेमाधवपंडितपूछे सीताकहे सिद्धिहोइ ।।१२।। इति
ध्रुववचनप्रमाणपुस्तसमाप्तमेतत ।।

मे	वृ	मि	क	रामराम
सि	क	तु	वृ	सीतारामसरा
ध	म	कुं	मी	हनुमान

दिषु विश्वासः श्रद्धा समाधानं किं चित्तैकाग्रता मुमुक्षुत्वं किं मोक्षो मे भू-
यादिति इच्छा एतत्साधनचतुष्टयं ततस्तत्वविवेकस्याधिकारिणो भवंति
तत्वविवेकः कः आत्मा सत्यस्तदन्यत् मिथ्येति ॥ आत्मा किं स्थूलसूक्ष्मका-
रणशरीराद्व्यतिरिक्तः पंचकोशातीतः सन् अवस्थात्रयसाक्षी सच्चिदानं-
दस्वरूपः सन्यः तिष्ठति स आत्मा स्थूलशरीरं किं पंचीकृतपंचमहाभू-
तैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगायतनं शरीरं अस्ति जायते वर्द्ध-
ते विपरिणमते अपक्षीयते विनश्यतीति षड्विकारवत् तत् स्थूलशरीरं
सूक्ष्मशरीरं किं अपंचीकृतपंचमहाभूतैः कृतं सत्कर्मजन्यं सुखदुः-
खभोगसाधनं ज्ञानेंद्रियाणि पंच कर्मेंद्रियाणि पंच प्राणादयः पंच मन-

श्चैकं बुद्धिश्चैका एवं सप्तदशकलाभिः सह तिष्ठति तत्सूक्ष्मशरीरं कारण
शरीरं किं अनिर्वाच्यानाद्यविद्यारूपं शरीरद्वयस्य कारणमात्रं सत्
स्वस्वरूपज्ञानं निर्विकल्पकरूपं यदस्ति तत्कारणशरीरं अवस्थात्र
यं किं जाग्रत्स्वप्नसुषुप्त्यवस्था जाग्रदवस्था का श्रोत्रादिज्ञानेन्द्रिये
श्शब्दादिविषयैर्ज्ञायते इति यत् जाग्रदवस्था ॥५॥ स्थूलशरीराभि
मानी आत्मा विश्व इत्युच्यते ॥ स्वप्नावस्था केति चेत् जाग्रदवस्थायां य
द्दृष्टं यच्छ्रुतं तज्जनितवासनया निद्रासमये यः प्रपंचः प्रतीयते सा स्व
प्नावस्था ॥ सूक्ष्मशरीराभिमानी आत्मा तैजस इत्युच्यते अतः सुषुप्त्यवस्था
का अहं किमपि न जानामि सुखेन मया निद्रानुभूयते इति यत् सुषुप्त

वस्थाकारणशरीराभिमानी आत्मा प्राज्ञ इत्युच्यते। पंचकोशाः के अन्न
मय १ प्राणमय २ मनोमय ३ विज्ञानमय ४ आनंदमयश्चेति ५ अन्न
मयः कः अन्नरसेनैव भूत्वा अन्नरसेनैव अभिवृद्धिं प्राप्य अन्नरूपपृ
थिव्यां यद्विलीयते तदन्नमयकोशः मनोमयः कः मनश्च ज्ञानेंद्रियपंचकं
मिलित्वा भवति मनोमयकोशः विज्ञानमयः कः बुद्धिज्ञानेंद्रियपंच
कं मिलित्वा विज्ञानमयकोशो भवति एवमेव कारणशरीरभूताविद्यास्थ
मलीनसत्वं प्रियादिवृत्तिसहितं सत् आनंदमयकोशः एतत्कोशपंचकं च मदीयं
शरीरं मदीयाः प्राणाः मदीयं मनश्च मदीया बुद्धिर्मदीयं ज्ञानमिति स्वेनैव ज्ञा
यते॥ तद्यथा मदीयत्वेन ज्ञातं कुंडलकटकगृहादिकं स्वस्माद्भिन्नं। तथा पंच

पंचकोशादिकं मदीयत्वेन ज्ञातं आत्मा न भवति॥ आत्मा कस्तर्हि सच्चिदानंदस्व
रूपः सत्यकल्पः॥ कालत्रये पि तिष्ठतीति सत चित्का ज्ञानस्वरूपी आनंद
कः सुखस्वरूपः एवं सच्चिदानंद स्वरूपं स्यात्मानं जानीयात॥ अथच
तुर्विंशतितत्वोत्पत्तिवक्ष्यामः॥ ब्रह्मराश्रया सत्वरजस्तमोगुणात्मिका
मायाऽस्ति॥ ततआकाशः संभूतः आकाशाद्वायुः॥ वायोरग्निः अग्नेराप:
आपः पृथिवी एतेषां पंचतत्वानां मध्ये आकाशस्य सात्विकांशात् श्रोत्रें
द्रियं संभूतं॥ वायोः सात्विकांशात्त्वगिंद्रियं संभूतं॥ अग्नेः सात्विकांशाच्च
क्षुरिंद्रियं संभूतं॥ जलस्य सात्विकांशाद्रसनेंद्रियं संभूतं पृथिवीसात्वि
कांशाद्घ्राणेंद्रियं संभूतं॥ एतेषां पंचतत्वानां समष्टि सात्विकांशादंतःकर

णां तद्वृत्तिभेदात्मनोबुद्ध्यहंकारचित्तांतःकरणानि संभूतानि॥ एतेषां पंचत
त्वानां मध्ये आकाशस्य राजसांशात् वागिंद्रियं संभूतम्॥ वायो राजसांशात्पा
णींद्रियं संभूतं॥ वह्नेः राजसांशात्पादेंद्रियं संभूतं। जलस्य राजसांशादुपस्थें
द्रियं संभूतं। पृथ्वी वीराजसांशात् गुदेंद्रियं संभूतं। एतेषां पंचतत्वानां समष्टि
राजसांशात्प्राणपंचकं संभूतम्॥ एतेषां पंचमहाभूतानां तामसांशात्पंचपंचकं
एकं द्विधा विभज्य एकमर्धं तूष्णीमवस्थाप्य॥ अपरं अपरमर्धं चतुर्धा विभ
ज्य स्वार्धमन्येषु अर्धेषु स्वभागचतुष्टयं संयोजनं कार्यं तदा पंचीकरणं भवति॥
एतेभ्यः पंचीकृतपंचमहाभूतेभ्यः स्थूलशरीरं भवति॥ पिंडब्रह्मांडयोरैक्य
ब्रह्मांडं च संभूतं स्थूलशरीरस्याभिमानि विश्वनामकं ब्रह्मप्रतिबिंबं भवति

सचजीवः प्रकृतस्त्वस्मिन् ईश्वरभिन्नत्वं जानाति॥ अविद्योपाधिः सन्नात्मा जी
व इत्युच्यते॥ मायोपाधिः सन्नीश्वर इत्युच्यते॥ एवं उपाधिभेदाज्जीवेश्वरभे
ददृष्टिः यावत्पर्यंतं तिष्ठति तावत्पर्यंतं जन्ममरणादिरूपः संसारो न निवर्तते।
तस्मात्कारणात् जीवेश्वरभेदबुद्धिः कार्या॥ ननु साहंकारस्य किंचिज्ज्ञस्य जी
वस्य निरहंकारस्य सर्वज्ञस्येश्वरस्य तत्त्वमसीति महावाक्यात्कथमभेदबुद्धिः
स्यादुभयोर्विरुद्धधर्माक्रांतत्वादिति चेत् न स्थूलसूक्ष्मशरीराभिमानी त्वंपदवा
च्यार्थः उपाधिविनिर्मुक्तं समाधिदशासंपन्नं शुद्धं चैतन्यं लक्ष्यं॥ एवं सर्वज्ञत्वादिविशि
ष्ट ईश्वरः तत्पदवाच्यः। उपाधिशून्यं शुद्धचैतन्यं लक्ष्यं॥ एवं च जीवेश्वरयोः
अभेदबाधकाभावः॥ एवं च वेदांतवाक्यैः सद्गुरूपदेशेन च सर्वेष्वपि भूते

चै ३

एंतवृत्ति भेदात्मनो बुद्ध्यहंकारचित्तांतःकरणानि संभूतानि॥ एतेषां पंचत
त्वानां मध्ये आकाशस्य राजसांशात् वागिंद्रियं संभूतम्॥ वायो राजसांशात्पा
णींद्रियं संभूतं॥ वह्नेः राजसांशात्पादेंद्रियं संभूतं। जलस्य राजसांशादुपस्थें
द्रियं संभूतं। पृथ्वी वीराजसांशात् गुदेंद्रियं संभूतं। एतेषां पंचतत्वानां समष्टि
राजसांशात् प्राणपंचकं संभूतम्॥ एतेषां पंचमहाभूतानां तामसांशात् एकैकं
एकं द्विधा विभज्य एकमर्धं तथैव स्थाप्य॥ अपरं अपरमर्धं चतुर्धा विभ
ज्य स्वार्धं अन्येष्वर्धेषु स्वभागचतुष्टयं संयोजनं कार्यं तदा पंचीकरणं भवति॥
एतेभ्यः पंचीकृतपंचमहाभूतेभ्यः स्थूलशरीरं भवति॥ पिंडब्रह्मांडयोरैक्य
ब्रह्मांडवत्संमतं स्थूलशरीराभिमानि जीवनामकं ब्रह्मप्रतिबिंबं भवति


षु येषां बुद्धिरुत्पन्ना ते जीवन्मुक्ता इत्यर्थः ननु जीवन्मुक्तः कः यथा देहोहं
पुरुषोहं ब्राह्मणोहं शूद्रोहमस्मीति दृढनिश्चयस्तथा नाहं ब्राह्मणः न शूद्रः न पुरुषः
किंतु असंगः सच्चिदानंदस्वरूपः प्रकाशरूपः सर्वांतर्यामी चिदाकाशरूपोस्मीति
दृढनिश्चयरूपापरोक्षज्ञानवान् जीवन्मुक्तः ब्रह्मैवाहमस्मीत्यपरोक्ष
ज्ञानेन निखिलकर्मबंधविनिर्मुक्तः स्यात्॥ कर्माणि कतिविधानि संतीति चेत्।
आगामिसंचितप्रारब्धभेदेन त्रिविधानि संति॥ ज्ञानोत्पत्त्यनंतरं ज्ञानिदेहकृतं पु
ण्यपापरूपं कर्म यदस्ति तदागामीत्यभिधीयते॥ संचितं कर्म किं॥ अनंतकोटिज
न्मनां बीजभूतं सत् यत्कर्मजातं पूर्वार्जितं तिष्ठति तत्संचितं ज्ञेयं॥ प्रारब्धं कर्म
तत्प्रारब्धं भोगेन नष्टं भवति॥ प्रारब्धकर्मणां भोगादेव क्षय इति॥ संचितं कर्म

श्रीनैवाहमिति निश्चयात्मकज्ञानेन नश्यति ॥ आगामिकर्मापि ज्ञानेन नश्यति ॥ किंच
आगामिकर्मणां नलिनीदलगतजलवत् ज्ञानिनां संबंधो नास्ति किंच ये ज्ञा
निनं स्तुवंति भजंति अर्चयंति तान्प्रति ज्ञानिकृतं आगामि पुण्यं गच्छति ये च
ज्ञानिनं निंदंति द्विषंति दुःखप्रदानं कुर्वंति तान्प्रति ज्ञानिकृतं आगामि क्रियमा
णापवाच्यं कर्म पापात्मकं गच्छति तथा च श्रुतिः सुहृदः पुण्यकृतं द्विषंतः
पापकृत्यं गृह्णंतीति तथा चात्मवित् संसारं तीर्त्वा ब्रह्मानंद इह प्राप्नोति तरति
शोकमात्मवित् इत्यादि श्रुतेः ॥ तनुं त्यजतु वा काश्यां श्वपचस्य गृहे ऽथवा ज्ञानसं
प्राप्तिसमये मुक्तासौ विगताशयः इति स्मृतेश्च ॥ इति तत्त्वबोधप्रकरणं संपू
र्णम् शुभमस्तु ॥ संवत् १८६० श्रीराम० भाद्रकृष्ण २ रविवासरे ॥०॥०॥०॥०॥

श्रीगणेशाय नमः॥ ॐ आप्यायंतु ममांगानि वाक्प्राणश्चक्षुः श्रोत्रमथोबलमिंद्रिया
णि च सर्वाणि॥ सर्वं ब्रह्मोपनिषदं माहंब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरण
मस्त्वनिराकरणं मेस्तु॥ तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि संतु ते मयि संतु॥ ॐ
शांतिः॥३॥ केनेषितं पतति प्रेषितं मनः॥ केन प्राणः प्रथमः प्रैति युक्तः॥ केनेषितां वाच
मिमां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति॥ श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वा
चं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवं
ति॥ न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशि
ष्यात्॥ अन्यदेव तद्विदितादथो अविदितादधि॥ इति शुश्रुम पूर्वेषां ये नस्तद्व्या
चचक्षिरे॥ यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिद

॥ केनोपनिषत्प्रारंभः ॥

अथ गुरुपरम्परा प्रारम्भः ॥



भारतभ्राता यन्त्रालयमें मुद्रित हुई सं० [illegible]

श्रीमतेरामानुजायनमः ॥ अस्मद्गुरुभ्योनमः ॥
अस्मत्परमगुरुभ्योनमः ॥ अस्मत्सर्वगुरुभ्योनमः ॥
श्रीमतेरामानुजायनमः ॥ श्रीपराङ्कुशदासायनमः ॥
श्रीमद्यामुनमुनयेनमः ॥ श्रीराममिश्रायनमः ॥ श्री
मते पुण्डरीकाक्षायनमः ॥ श्रीमन्नाथमुनयेनमः ॥
श्रीमते शठकोपायनमः ॥ श्रीमते विष्वक्सेनाय
नमः श्रियैनमः श्रीधरायनमः ॥ अस्मद्देशिकमस्म

गु
२

दीशपरमाचार्य्यानशेषान्गुरून् श्रीमल्लक्ष्मणयो
गिपुङ्गवमहापूर्णौ मुनिं यामुनं ॥ रामं पद्मविलोचनं
मुनिवरं नाथं शठद्वेषिणं सेनेशं श्रियमिंदिरा सहचरं
नारायणं संश्रये १ लक्ष्मीनाथसमारम्भां नाथयामुन
मध्यमाम्॥ अस्मदाचार्य्यपर्यन्तां वन्दे गुरुपरम्पराम् २
नारायणस्वमरकिङ्करभावजुष्टं लक्ष्मीप्रपन्नकरुणार्द्र
कटाक्षलक्ष्यम् ॥ श्रीमन्मुकुन्दपदपङ्कजचञ्चरीकं श्री

२

गु०
२

मज्जनार्दनगुरुं सततम्भजामि ३ श्रीमन्मुकुन्दपदप
ङ्कजभृङ्गराजं वेदान्तवेद्यपुरुषेऽर्पितस्वात्मभावम् ॥
दीनात्मनां करुणयार्तिहरं दयालुं लक्ष्मीप्रपन्नमुनि
वर्य्यमहं प्रपद्ये ४ श्रीराजगोपालपदाब्जभृङ्गसर्वाम्
शास्त्रार्थविशेषतत्वम् ॥ कात्यायनार्यान्वयपूर्णचन्द्रं
श्रीमन्मुकुन्दार्यमहं भजामि ५ नीलाद्रिनाथकैंकर्य
दत्तप्रवणमानसम् ॥ सौम्ययोगिजपापार्चं श्रीगोपा

२

गु०

४

लमहं भजे ६ श्रीवेङ्कटार्यान्वयसिन्धुसोमं श्री२निवा
सार्यपदाब्जभृङ्गं यं वारवर्यस्वकृपावलम्बं श्रीसौम्यजा
मातृमुनिं भजामि ७ श्रीमद्वादिभयङ्करान्वयरत्नौ
श्री२ निवासे गुरौ भक्तं स्वामिसुतरत्नं स्थिरतमं श्रान्तं
भजन्तं विभुम् ॥ वेदान्तोभयसारचिन्तनरतं शान्तं
दयासागरं श्रीनीलाचलनाथसेवनपरं यम्बारमार्यं
भजे ८ श्रीमन्धरबकुलवारिधिशीतभानुं रामानु

४

गु०

५

जार्यतनयोत्तममम्बुजाक्षिम् ॥ सेवे सदा सजगता
मपि नाथभाजं भजे तथापि मम नाथमनन्यभावम् ९
श्रीलंकायनवंशदुग्धजलधेराकासुधादीधितिं श्रीरा
मानुजयोगिदेहजवरं तत्पादपद्माश्रयम् ॥ भक्तानु
ग्रहपारतन्त्र्यसुभगं श्री२निवासार्यसत्पौत्रं श्रेष्ठगुणं
नमामि शिरसा श्रीनिवासं गुरुम् १० श्रीनिवासगुरो
पादसरसीरुहषट्पदम् ॥ वेदान्तद्वयसारज्ञं रा

५

मानुजगुरुम्भजे ११ वेङ्कटार्य्यपदाम्भोजद्वन्द्वप्रवणमानसम् ॥ तत्सूनुतत्कृपापात्रं श्रीनिवासगुरुम्भजे १२ वेदान्तदेशिककटाक्षविवृद्धबोधं कान्तोपयन्त्रियमिनःकरुणैकपालम् ॥ वत्सान्ववायमनवद्यगुणैरुपेतं भक्त्याभजामिपरवादिभयंकरार्य्यम् १३ श्रीशैलेशदयःपात्रंधीभक्त्यादिगुणार्णवम् ॥ यतीन्द्रप्रवणंवन्देरम्यजामातरंमुनिम् १४ नमःश्रीशैलनाथायकुन्तीनग

रजन्मने ॥ प्रसादलब्धपरमप्राप्यकैंकर्य्यशालिने १५ लोकाचार्य्यायगुरवेकृष्णपादस्यसूनवे ॥ संसारभोगिसन्दष्टजीवजीवातवेनमः १६ श्रीकृष्णपादपादाब्जेनमामिशिरसासदा ॥ यत्प्रसादप्रभावेनसर्वसिद्धिरभून्मम १७ वेदान्तवेद्यामृतवारिराशेर्वेदार्थसारामृतपूरमग्र्यम् ॥ आदायवर्षंतमहंप्रपद्यकारुण्यपूर्णंकलिवैरिदासम् १८ नमोवेदांतवेद्यायजगन्मंग

स्त्वहेतवे ॥ यस्यवागमृतासारपूरितंभुवनत्रयम् १९
श्रीपराशरभट्टार्य्यः श्रीरंगेशपुरोहितः ॥ श्रीवत्सा
ङ्कसुतःश्रीमान् श्रेयसेमस्तुभूयसे २० रामानुज
पदच्छाया गोविन्दाह्वानपायिनी ॥ तदायत्तस्व
रूपासाजीयान्मद्विश्रमस्थली २१ योनित्यमच्युत
पदांबुजयुग्मरुक्मव्यामोहितस्तदितराणितृणायमे
ने॥ अस्मद्गुरोर्भगवतोस्यदयैकसिन्धोरामानुजस्य

चरणौशरणंप्रपद्ये २२ कमलापतिकल्याणगुणामृत
निषेवया ॥ पूर्णकामायसततंपूर्णायमहतेनमः २३
यत्पादांभोरुहध्यानविध्वस्ताशेषकल्मषः ॥ वस्तु
तामुपयातोहंयामुनेयंनमामितम् २४ अयत्नतोया
मुनमात्मदासमलर्कपत्रार्पणनिष्क्रयेण ॥ यःक्रीत
वानास्थितयौवराज्यंनमामितंराममेयसत्त्वम् २५
नमःपङ्कजनेत्राय नाथश्रीपादपंकजे॥न्यस्तसर्वभरा

यास्मत्कुलनाथायधीमते २६ नमोचिंत्याद्भुताक्लि
ष्टज्ञानवैराग्यराशये ॥ नथाय मुनयेगाधभगवद्भ
क्तिसिन्धवे २७ मातापितायुवतयस्तनयाविभूतिः
सर्वंयदेवनियमेनमदन्वयानाम् ॥ आद्यस्यनःकुल
पतेर्वकुलाभिरामं ॥ श्रीमत्तदंघ्रियुगलंप्रणमामिमू
र्ध्ना २८ भूतंसरश्चमहदाह्वयभट्टनाथश्रीभक्तिसार
कुलशेखरयोगिवाहान् ॥ भक्तांघ्रिरेणुपरकालयती

न्द्रमिश्रान् श्रीमत्परांकुशमुनिंप्रणतोस्मिनित्यम् २९
गुरुमुखमनधीत्यप्राहवेदान्तशेषान् नरपतिपरि
क्लृप्तंशुल्कमादातुकामः॥ श्वसुरममरवंद्यंश्रीरङ्गनाथ
स्यसाक्षाद्विजकुलतिलकंतंविष्णुचित्तंनमामि ३०
श्रीरंगचन्द्रमसमिन्दिरयाविहर्तुं विन्यस्यविश्वचिद
चिन्नयनाधिकारं ॥ योनिर्वहत्यनिशमंगुलिमुद्रयैव
सेनान्यमन्यविमुखास्तमशिश्रियामः ३१ नमःश्रीरङ्ग

नायक्यैयद्भ्रुविभ्रमभेदतः ॥ दृष्टे स्मितव्यवेद्यख्यानि
स्त्रोन्नतमिदंजगत् ३२ श्रीलक्ष्मणार्यसंतकः श्रीकृष्ण
यमाश्रये ॥ चिन्तामणिमिवोद्भ्रान्तमुत्संगेनंतभो
गिनः ३३ नमोस्मदाचार्यपरम्पराभ्योनमोभागवत
द्भ्योनमोनमः नन्तसुखागरेभ्यो नमः श्रियःपतये
नमोस्तु ॥ ३३ ॥ इतिगुरुपरम्परासम्पूर्णम् ॥

इदंपुस्तकं भारतभ्राता यन्त्रालये मुद्रितं सं० १८४६

त०म०

१

श्रीगणेशाय नमः॥ श्रीशिवाय नमः॥ बुद्ध्वा यानिखिलार्चितास्त्रिदशसंदोहाः सदाभोदयास्वा
ज्ञानप्रशमापयन्त्रमनसो बुधीस्समस्तापदः॥ श्रीविघ्नेश्वररांवुजं भवभयध्वंसैकवी
जंपरं हृत्सद्मे विनिधाय तंनिरुपमं तत्त्वानुसंधीयते॥१॥ अथ श्रुतिः स्मर्यते॥ आत्मा वारे
द्रष्टव्यः श्रोतव्यः मंतव्यो निदिध्यासितव्य इति॥ अस्यार्थः॥ मुमुक्षुणा आत्मा द्रष्टव्यः मु
मुक्षोरात्मदर्शनस्य साधनमिति यावत्। आत्मदर्शनोपायः कइत्यत आह। श्रोतव्य इत्यादि
ति नार्थक्रमेण श्रवणादुक्रमस्य स्फोटो भवति। अग्निहोत्रं जुहोति यवागूं पचतीत्यादिवत्॥
तथाच। श्रवणमनननिदिध्यासनानि तत्त्वज्ञानजनकानीत्युक्तं भवति॥ अत्र श्रुतिः

राम:

१

कृतात्मश्रवणस्य मननेऽधिकारः॥ मननं चात्मन इतरभिन्नत्वेनानुमानम्॥ तच्च भेदप्रतियोगित
रज्ञानं न साध्यम्। तथा च इतरत्वज्ञाने तदर्थं पदार्थनिरूपणं संक्षेपतः। सामान्यतः पदार्थो द्विविधः
भावोऽभावश्च। भावः षड्विधः। द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात्। तत्र द्रव्यत्वगुण
त्वकर्मत्वानि जातयः। सामान्यत्वादीन्युपाधयः। द्रव्याणि नव। पृथिव्यप्तेजोवाय्वाकाशका
लदिगात्ममनांसि॥ आकाशत्वकालत्वदिक्त्वान्युपाधयः। अन्यानि जातयः। तत्र रूपरसगं
धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराश्चतुर्दशगु
णाः पृथिव्याम्॥ रूपरसस्पर्शस्नेहसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरु
त्वद्रवत्वसंस्काराश्चतुर्दशगुणा अपाम्। रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग

परत्वापरत्वसंस्कारा एकादश गुणास्तेजसः ॥ स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसं
स्कारा वायोर्गुणा नव ॥ शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः षड्गुणा आकाशस्य ॥ संख्याप
रिमाणपृथक्त्वसंयोगविभागाः पञ्चगुणाः कालदिशोः ॥ संख्यापरिमाणपृथक्त्वसंयोगविभागबु
द्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्दशगुणाः आत्मनः ॥ संख्यापरिमाणपृथक्त्व
संयोगविभागपरत्वापरत्वसंस्कारा अष्टौ गुणा मनसः ॥ ज्ञानेच्छाकृतिसंख्यादिपंचकाष्टौ गु
णा ईश्वरस्य ॥ तथा चावायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश ॥ दिक्काल
योः पंच षडेव चांबरे महेश्वरे ऽष्टौ मनसस्तथैव च ॥ एतत्र पृथिवीजलतेजोवायवो द्विविधाः प
रमाणवः सावयवाश्च ॥ आकाशकालात्मदिशो विभुरूपाः ॥ मनः परमाणुरूपम् ॥ तत्र सा

वयवाश्च नित्याः। इतराणि नित्यानि। सावयवा वा त्रिविधः। शरीरेंद्रियविषयभेदात्। मानुषाणां श
रीरं पार्थिवम्। जलीयं शरीरं वरुणलोके प्रसिद्धं। तैजसं शरीरं आदित्यलोके। वायवीयं शरीरं
वायुलोके। घ्राणेंद्रियं पार्थिवम्। रसनेंद्रियं जलीयम्। चक्षुरिंद्रियं तैजसम्। त्वगिंद्रियं वा
यवीयं। श्रोत्रेंद्रियं कर्णशष्कुल्यवच्छिन्ननभःप्रदेशः। एतानि पंच बहिरिंद्रियाणि। मनोंत
रिंद्रियम्। तेन षडिंद्रियाणि। विषयाश्च शब्दादिरूपेण प्रसिद्धाः॥ आत्मा द्विविधः। परमात्मा
जीवात्मा च। तत्र जीवात्मनः प्रतिशरीरं भिन्नाः बंधमोक्षयोग्याः। परमात्मा ईश्वरः। अथ प्रत्यक्ष
प्रत्यक्षद्रव्याणि। परमाणुद्व्यणुके अप्रत्यक्षे। उद्भूतरूपवत्त्वे पञ्चतानि पृथिवीजलतेजांसि
प्रत्यक्षाणि। आत्मा च प्रत्यक्षः॥ वाय्वाकाशकालदिङ्मनांसि तु अप्रत्यक्षाणि। वहिर्द्रव्य

त०म०

३

प्रसक्तं इति महत्त्वे सत्युद्भूतरूपवत्त्वं प्रयोजकं॥ अथ यद्व्योसन्निप्रकृष्टा तत्रो सत्तिः कारणव-
ताम्। अनन्यथासिद्धनियतपूर्ववृत्तिकारणम्। तत्त्वं कारणत्वम्। त्रिविधानि कारणा-
नि। समवायिकारणान्यसमवायिकारणानि निमित्तकारणानि॥ यत्समवेतं कार्यमु-
त्पद्यते तत्समवायिकारणं॥ यथा परमाणुर्द्व्यणुकस्य। कपालं घटस्य। समवायिकारणे
संबद्धं कारणमसमवायिकारणम्। यथा परमाणुद्वयसंयोगो द्व्यणुकस्य कपालसंयोगो घ-
टस्य। एतदुभयभिन्नं यत्कारणं तन्निमित्तकारणम्। यथा द्व्यणुके ईश्वरः। घटे दंडः। ए-
तत्कारणत्रयं भावकार्यमात्रस्य। तत्र समवायिकारणं सर्वं द्रव्यमेव। असमवायिकारणं द्व-
येगुणाः। गुणो गुणाः। कर्म च। कार्यमात्रं प्रति साधारणकारणानि। ईश्वरः तज्ज्ञानेच्छाकृ-
तयः प्रा[illegible]गभावकालदिगदृष्टानि। तत्र परमाणुद्वयसंयोगात् द्व्यणुकमुत्पद्यते। संयुक्तद्व्यणु

वा

राम:

३

क[illegible]त्र पात त्रसरेणुः। एवं चतुरणुकादिकपालांतम्।। कपालद्वयसंयोगेन घटोत्पद्यते। घटस्तु
सावयवो। अवयवप्रकरणं कथ्यते। प्रत्यक्षद्रव्ये प्रत्यक्षमेव प्रमाणम्। अतींद्रिये त्वनुमानं प्र
त्यक्षहेतुसाध्यदृष्टांतज्ञानसाध्यम्। विशेषो वक्ष्यते। परमाणुद्व्यणुकानुमानम्। त्रस
रेणुः सावयवद्रव्यारब्धः बहिरिंद्रियवेद्यद्रव्यत्वात्। बहिरिंद्रियवेद्यद्रव्यं यत्तत्सावयव
द्रव्यारब्धम्।। यथा घटः। अत्र त्रसरेणुः पक्षः सावयवद्रव्यारब्धत्वं साध्यम्। बहिरिंद्रियवेद्य
द्रव्यत्वादिति हेतुः। घटो दृष्टांतः। अनेन द्व्यणुकः परमाणुश्च सिध्यति। आकाशं वायुश्च श
ब्देन स्पर्शेन चानुमीयते। शब्दो द्रव्याश्रितो गुणत्वात्।। यथा घटरूपं। अनेन द्रव्यांतरबाधा
त्। शब्दाश्रयत्वेनाकाशं सिध्यति। पृथिव्यादिचतुष्टयावृत्तिरूपस्पर्शो द्रव्याश्रितो गुणत्वात्।।

इत्यनुमानेन द्रव्यांतरसंबंधात् । स्पर्शाश्रयत्वेन वायुः सिध्यति ॥ काले प्रमाणमाह परत्वापरत्वे द्वैविध्यं
कालिके दैशिके च । परत्वोत्पत्तिश्च बहुतररविक्रियाविशिष्टशरीरज्ञानात् । तस्य स्वं ज्येष्ठत्वम् ॥
अपरत्वोत्पत्तिश्च स्वल्पतररविक्रियाविशिष्टशरीरज्ञानात् । अपरत्वं च कनिष्ठत्वम् । तदनुमाने प
या । परत्वजनकं बहुतररविक्रियाविशिष्टशरीरज्ञानमिदं परंपरासंबंधघटसापेक्षं स्वघ ।
साक्षात्संबंधाभावे सति विशिष्टज्ञानत्वात् । लोहितः स्फटिक इति प्रत्ययवत् । परंपरासं
बंधश्च रविक्रियायाः स्वसमवायिसंयुक्तसंयोगः । तेन संबंधघटकः कालः सिध्यति ॥ ०
ननु कालस्य भूतभविष्यद्वर्तमानभेदेन बहुत्वात्कुत एकत्वमिति न वाच्यम् । उपाधिभे
देन तद्भेदप्रत्ययात् । कालोपाध्योरविक्रियादिरूपाभिन्ना एव । दैशिकपरत्वापरत्व

ष्यां च दिशः सिद्धिः। ते च दूरत्वसमीपत्वे भवतः। परत्वजनकं ह्यवधिसापेक्षं वृत्तरसंयोगविशिष्टशरीर
ज्ञानमिदं परंपरासंबंधघटकसापेक्षमित्याद्यपि पूर्ववत्। तेन च दिशः सिद्धिः॥ न चाकाश
मेव संबंधघटकमास्तामिति वाच्यम्। तस्य शब्दाश्रयत्वेनैव धर्मिग्राहकप्रमाणसिद्धत्वा
त्॥ नरविक्रियाद्युपनायकत्वसंभवः। अहं सुखी इत्यादिप्रत्यक्षमात्मनि प्रमाणम्। ईश्व
रे चानुमानम्। यथा क्षित्यादिः सकर्तृका कार्यत्वात्। घटवत्। तेन ईश्वरस्य तद्वृत्तिनित्यज्ञाने
च्छाकृतीनां तत्सर्वज्ञत्वस्य च सिद्धिः। मनसि प्रमाणं यथा। सुखादिप्रत्यक्षं इंद्रियजन्यम्। ज
न्यप्रत्यक्षत्वात्। घटप्रत्यक्षवत्। तथा चेंद्रियांतरबाधे मनसः सिद्धिः॥ अथ द्रव्यनाशप्रक्रि
या। द्रव्यनाशो द्विविधः। क्वचिदसमवायिकारणनाशात्। क्वचित्समवायिकारणनाशा

च्चा।तत्राद्योयथा।परमाणुद्वयसंयोगनाशात् द्व्यणुकनाशः।द्वितीयोयथा।कपालनाशात्
घटनाशः।घटनाशेउभयविधः प्रध्वंसः संभवति।आकाशकालदिगात्मपरमाणवोऽव
त्ययः समवायश्च।।पृथिव्यादिपंचानां भूतत्वम्।।पृथिवीजलतेजोवायुमनसां क्रियाव
त्त्वम् मूर्त्तत्वम्।पृथिवीजलतेजोवायवो द्रव्यसमवायिकारणानि।कालस्यकालिकसं
बंधेन सर्वाधिकरणत्वम्।दिशोदैशिकसंबंधेन सर्वाधिकरणत्वम्।।अथगुणाःकथ्यं
ते।।रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखे
च्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशतिगुणाः।।रूपस्य
त्वादीनिसर्वाणिपवजातयः।रूपंपृथिव्यादित्रयवृत्ति।तच्चशुक्लनीलरक्तपीतकपिशह

रितक्चित्रभेदेनबहुविधम्।पृथिवीवृत्ति।स्वच्छंशुक्लंरूपंजलवृत्ति।शुक्लंभास्वरंरूपंतेजोवृत्ति॥
रसःपृथिवीजलवृत्ति।तत्रमधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः।रसःपृथि
व्याम्।जलेमधुरएव।गंधोद्विविधः।सुरभिरसुरभिश्च।पृथिवीमात्रवृत्तिः।स्पर्शश्च
पृथिव्यादिचतुष्टयवृत्तिः।सचत्रिविधः।अनुष्णाशीतःशीतःउष्णश्च।अनुष्णाशीत
स्पर्शोवायुपृथिव्योः।जलेशीतः।तेजस्युष्णः।संख्यापरिमाणपृथक्त्वसंयोगविभागाः
नवद्रव्यवृत्तयः।परत्वापरत्वेपृथिवीजलतेजोवायुमनोवृत्तिनी।बुद्धिसुखदुःखेच्छाद्वे
षप्रयत्नभावनाधर्माधर्मआत्मवृत्तयः॥गुरुत्वंपृथिवीजलवृत्ति।द्रवत्वंपृथिवीजल
तेजोवृत्ति।तद्द्विविधम्।नैमित्तिकंसांसिद्धिकंच।आद्यंपृथिवीतेजसोः।द्वितीयंजले।स्नेहो

जलमात्रवृत्तिः। संस्कारः पृथिवीजलतेजोवाय्वात्ममनोवृत्तिः। वेगोभावनास्थितिस्था
पकश्च। तत्र वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः। द्वितीयः आत्मवृत्तिः। तृतीयः पृथिव्या
दिचतुष्टयवृत्तिः। शब्दो द्विविधः। वर्णात्मको ध्वन्यात्मकः। आकाशमात्रवृत्तिः। रूपर
सगंधस्पर्शस्नेहसांसिद्धिकद्रवत्वशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभा
वनाविशेषगुणाः। तथा चोक्तम्। रूपंगंधोतथास्पर्शः स्नेहसांसिद्धिको द्रवः। बुद्ध्या
दिभावनांतश्च शब्दो वैशेषिका गुणाः। १। संख्यापरिमाणपृथक्त्वसंयोगविभाग
परत्वापरत्वगुरुत्वनैमित्तिकद्रवत्ववेगास्थितिस्थापकश्च सामान्यगुणाः। अथ विस
गुणाः। जलतेजोवायुपरमाणूनां विशेषगुणाः। अथ प्रसंगगुणाः। गुरुत्वधर्माधर्म

भावनास्थितिस्थापकाः परमाणुद्व्यणुकवृत्तिगुणाः। अतीन्द्रियवृत्तिसामान्यगुणाः। त्रसरेणोः
रूपं विहायान्ये गुणाः अतीन्द्रियाः। रूपरसगंधस्पर्शस्नेहद्रवसंख्येमहत्वे समुद्भूतरूपवत्त्वं प्रयो
जकम्। सामान्यगुणप्रत्यक्षे आश्रयप्रत्यक्षं। बुद्धिप्रत्यक्षे स्ववृत्तिविशिष्टज्ञानत्वम्॥ सु
खादिप्रत्यक्षे स्ववृत्तित्वसुखत्वादिकमेव॥ ध्वंसाद्यशब्दं विहाय सर्वशब्दप्रत्यक्षे। अथ गुणो
त्पत्तिप्रक्रिया। अवयववृत्तिविशेषगुणाः अवयविनि स्वसमानजातीयगुणानारभंते॥ पृथि
वीविशेषगुणाः पाकजाः द्विविधाः। पाकप्रयोज्याः पाकजन्याश्च। कारणगुणप्रक्रमजन्याः
पाकप्रयोज्याः॥ अग्निसंयोगजन्या द्वितीयाः। श्यामे घटे अग्निसंयोगेन श्यामरूपनाशानंतरं
घटे रक्तरूपमुत्पद्यते इति नैयायिकमतम्। अग्निसंयोगेन परमाणुपाके सति परमाणौ रक्त

रूपमुत्पद्यते पुनर्नष्टोत्पन्ने सत्तांकारणगुणक्रमेणाघटेरक्तरूपमुत्पद्यते इति वैशेषिकमतं
कपालं नीलमेकमेकं च पीतं यदि तदा घटे चित्ररूपमुत्पद्यते। रसादावेवं संभवति। अतएव
निरसो न जायते। चित्ररसाद्यस्वीकारात्। गुरुत्वस्थितिस्थापकयोरप्यकारणगुणप्रक्रम
जन्यता। द्वित्वादयोऽपेक्षाबुद्धिजन्याः। परिमाणं चतुर्विधम्। अणु महद्ध्रस्वं दीर्घं च। कारण
गुणप्रक्रमजन्यम्। स्वावयववहुत्वं च महत्वजनकम्। यथा त्रसरेणूनाम्। अवयवानां शिथि
लः संयोगः प्रचयोपि तज्जनकः। यथा तूलपरिमाणम्। एवं चाकारणगुणप्रक्रमजन्यम्॥
ननु तत्र किं प्रमाणम्। घटात्पटः पृथगिति प्रत्ययस्य उत्पत्तिस्तस्यान्योन्याभावविषयकत्वमिति चेन्न।
अन्योन्याभावप्रत्ययप्रतियोग्यनुयोगिनोः समानविभक्तिकत्वनियमात्। यथा घटः पटो न॥

अन्योन्याभावस्याप्यव्याप्यवृत्तित्वे घटवति पटो नेत्यपि प्रयोगापत्तेः। न चैवं घटादन्यः पट इत्यत्र कथम
न्योन्याभावप्रतीतिरिति वाच्यम्॥ अन्यत्वस्यापि पृथक्त्वरूपत्वात्। संयोगस्त्रिविधः। अन्यतर
कर्मजः। उभयकर्मजः। संयोगजश्च॥ आद्यो यथा। मनःकर्मणा आत्ममनसोः संयोगः। द्विती
यो यथा। मेषयोः कर्मणा तयोः संयोगः। तृतीयो यथा। कारणाकारणसंयोगात्कार्याकार्य
संयोगः। हस्ततरुसंयोगात्कायतरुसंयोगः। विभागस्त्रिविधः। अन्यतरकर्मजः। उभयक
र्मजः। विभागजश्च। आद्यो यथा। मनःकर्मणा आत्ममनसोर्विभागः। द्वितीयो यथा। मेषयोः
कर्मणा तयोर्विभागः। विभागजविभागो द्विविधः। कारणमात्रविभागजः। कारणाकारण
विभागजश्च। आद्यो यथा। कपालकर्मणा कपालद्वयविभागः ततः कपालद्वयसंयोगनाशः
ततो घटनाशस्ततः कपालस्याकाशादिदेशाद्विभागजो विभागः॥ न च विभागः स्वोत्पत्त्यनंतर

मेवविभागजविभागंजनयतीतिवाच्यम्।द्रव्यनाशसहकृतस्यैवतस्यतद्धेतुत्वात्।द्रव्यस्य
प्रतिबंधकत्वेनसतिद्रव्येतदसंभवात्।नचकर्मैवएकदाकपालद्वयविभागंआकाशकपाल
विभागंचजनयतीतिवाच्यम्।।यद्द्रव्यानारंभकसंयोगविरोधिनंविभागमारभतेनैत
तद्द्रव्यारंभकसंयोगविरोधिनम्।यथाविकसत्कमलकुड्मलदलकर्मेतिव्याप्तेः।नचसंयो
गेष्टमस्तु।तत्राविरोधात्।द्वितीयस्तुकारणाकारणविभागात्कार्याकार्यविभागः।करत
रुविभागात्कायतरुविभागः।परत्वापरत्वोत्पत्तिःकालप्रकरणेउक्ता।बुद्धिर्ज्ञानम्।तद्द्विवि
धम्स्मरणम्।अनुभवश्च।स्मरणंद्विविधम्।यथार्थमयथार्थंच।तद्वतितत्प्रकारकत्वं
यथार्थत्वम्।तदभाववतितत्प्रकारकत्वमयथार्थत्वम्।पूर्वानुभवःसंस्कारद्वारास्म
रणंजनयति।तत्रपूर्वानुभवस्ययथार्थत्वायथार्थत्वाभ्यांस्मरणमुभयरूपंभवति।अनुभ

बोद्विविधः।प्रमाऽयथार्थश्च।तत्रप्रमा चतुर्विधमग्रा वक्ष्यते।अयथार्थज्ञानं चतुर्विधम्।संश
योविपर्ययः स्वप्नोऽनध्यवसायश्च।।संशयोयथा।।समानधर्मवद्धर्मिज्ञानविशेषादर्शन
कोटिस्मरणेभ्यः स्थाणुर्वा पुरुषो वा इति ज्ञानं जन्यते।स एव संशयः।विपर्ययस्तु समानध
र्मवद्धर्मिज्ञानविशेषादर्शनैककोटिस्मरणैः शुक्ताविदं रजतमिति ज्ञानं जन्यते।तत्र गुरु
मते इदमिति अनुभवात्मकज्ञानं रजतमिति स्मरणात्मकं तेन ग्रहणस्मरणात्मकज्ञानद्वयं।न
तु रजतत्वविशिष्टज्ञानमिदम्।अन्यस्य अन्यथाभाने सामग्र्यभावात्।प्रवृत्तिस्तु स्वतंत्रोप
स्थितेष्टभेदाग्रहात्।नैयायिकमते पूर्वतंकं विशिष्टज्ञानम्।तेन भ्रमः सिध्यति।स्वप्नस्तु अनु
भूतपदार्थस्मरणेभ्यः दृष्टेरा धातुदोषेन वा जन्यते।अनध्यवसायश्च किंचिदिति ज्ञानं विशेषा

दर्शनेन भवति। अत्र यद्यपि वह्निर्न स्यात्तदा निर्धूमः स्यात्। इति तर्को विपर्ययमध्ये बोध्यः
तत्र नैयायिकमते स्वप्नानध्यवसायौ विपर्ययमध्ये एव विद्योतेन तन्मते। यथार्थज्ञानं द्विविधम्।
संशयो विपर्ययश्च। सुखं धर्मजन्यम्। दुःखमधर्मजन्यम्। इच्छा इष्टसाधनताज्ञानज
न्या। द्वेषोऽनिष्टसाधनत्वज्ञानजन्यः। कृतिस्त्रिविधा। जीवनयोनियत्नरूपा प्रवृत्तिर्निवृ
त्तिश्च। आद्या जीवनादृष्टजन्या। द्वितीया इच्छाजन्या। तृतीया द्वेषजन्या। धर्मः श्रुतिविहि
तकर्मजन्यः। अधर्मः श्रुतिविरुद्धाचरणजन्यः। वेगाख्यः संस्कारः आद्यक्रियाजन्यः। द्विती
यादिक्रियाजनकः। पश्चाद्वेगेन वाणश्चलति। भावनाख्यः संस्कारः विशिष्टज्ञानजन्यः।
स्थितिस्थापकाख्यः कारणगुणप्रक्रमजन्यः। गुरुत्वं कारणगुरुत्वजन्यम्। नैमित्तिकद्र

वत्वं जतुघृतसुवर्णादीनां अग्निसंयोगजन्यम् । स्नेहकारणगुणापूक्रमजन्यः ।२। शब्दस्त्रि
विधः। संयोगजो विभागजः शब्दजश्च। आद्यो भेरीदंडसंयोगजन्यः। द्वितीयो वंश्या
द्विदलद्वयविभागजन्यः। तृतीयस्तु संयोगेन विभागेन वा आद्यशब्देन जनितेन तेन श
ब्देन निमित्तवायुसहकृतेन वीचीतरंगन्यायेन कदंबमुकुलन्यायेन वा जन्यते ॥ उ
त्क्षेपणं। अपक्षेपणं। आकुंचनं। प्रसारणं। गमनानि पंच कर्माणि। उत्क्षेपणत्वादीनि
जातयः। पृथिवीजलतेजोवायुवृत्तीनि कर्माणि। प्रत्यक्षवृत्तीनि वृत्तद्वाराणि। अथ कर्म
प्रक्रिया। संयोगेन नोदनाख्येनाद्यकर्म जन्यते। द्वितीयादि वेगजन्यम्। क्रिया। क्रियातो
विभागः। विभागात्पूर्वदेशसंयोगनाशः। उत्तरदेशसंयोगोत्पत्तिः। ततः कर्मविभा

गयो नेशः॥ सामान्यं द्विविधम्॥ व्यापकं व्याप्यं व्याप्यव्यापकं च॥ व्यापकं सत्ता
व्याप्यं घटत्वादि द्रव्यत्वादि व्याप्यव्यापकम्। यत्तेरभेदस्तुल्यत्वं संकरोथानवस्थि
तिः रूपहानिरसंबंधो जातिबाधकसंग्रहः। नित्यत्वे सति अनेकसमवेतत्वं इति
सामान्यलक्षणम्। सामान्यानि नित्यान्येव। अतींद्रियवृत्तीनि ऽप्रत्यक्षाणि।
प्रत्यक्षवृत्तीनि प्रत्यक्षाणि॥ नित्यद्रव्यवृत्तयोंत्या विशेषाः॥ वृत्तयो नित्या ऽतींद्रि
याश्चाप्रत्यक्षपरमाणूनां भेदायते स्वीक्रियंते तेषां वै धर्म्यव्याप्यत्वादिति॥ स्वसं
बंधिभिन्नो नित्यः संबंधः समवायः॥ तेन स्वरूपसंबंधस्य संयोगस्य च निरासः॥
अहे घटे घटत्वसमवेतत्वमिति प्रतीतेस्तत्प्रमाणम्॥ नैयायिकमते समवायः प्रत्यक्षः॥

नेत्र ४

प्र१

सचनित्यश्च ॥ ननुद्रव्यान्तरमपि अंधकारस्तु वर्त्ततेति द्रव्याणि संति कुतो स्यादेवेत्य
त्राह अपि संति कथं नैवेसाधितमेवम् ॥ अंधकारो न द्रव्यम् ॥ किन्तु तेजोभावः ॥ सुवर्णं ते
जएव ॥ आलस्यकृतस्य भावः एवमन्यदपि बोध्यम् ॥ अभावो द्विविधः ॥ संसर्गाभावो ॥
न्योन्याभावश्च ॥ आद्यस्त्रिविधः ॥ प्रागभावो ध्वंसो ॥ अत्यंताभावश्च ॥ प्रागभावो विना
शी अजन्यः ॥ ध्वंसो जन्यो ॥ विनाशी अत्यंता ॥ अन्योन्याभावो अजन्या अविनाशिनौ ॥ ये
ष्यानुपलब्ध्या अभावग्रहणम् ॥ अन्यत्रवतीन्द्रियः ॥ अथ प्रमा कथ्यते साचतुर्द्धा ॥
प्रत्यक्षानुमित्युपमितिशाब्दरूपा ॥ तत्करणानि प्रमाणानि चत्वारि ॥ प्रत्यक्षानुमा

न०२८
११

नोपमानशब्दभेदात्॥ अथ प्रत्यक्षं द्विविधम्॥ निर्विकल्पकं सविकल्पकं च॥ प्रत्य
क्षकारणानि षडिन्द्रियाणि॥ घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि॥ एतानि
स्वसन्निकर्षसहितानि प्रत्यक्षं जनयंति॥ सन्निकर्षो द्वेधा। लौकिकालौकिकभेदा
त्। अलौकिकस्त्रिविधः। ज्ञानलक्षणा सामान्यलक्षणा योगजधर्मश्च॥ लौकिकः ष
ड्विधः। संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः। समवायः। सम
वेतसमवायः। विशेषणता चेति॥ संयोगेन द्रव्यग्रहः। संयुक्तसमवायेन द्रव्य
स्य गुणकर्मद्रव्यत्वादिजातीनां प्रत्यक्षं। संयुक्तसमवेतसमवायेन शब्दमात्र
त्वादिजातीनां गुणाश्रितजातिकर्मवृत्तिजातीनां। समवायेन शब्दस्य। समवे
तसमवायेन शब्दवृत्तिजातेः। विशेषणतयाऽभावस्य समवायस्य च। अलौ

राम
११

किको यथा॥ ज्ञानलक्षणया सुरभिचंदनमिति चाक्षुषज्ञानम्॥ सामान्यलक्षणया
धूमत्वेन रूपेण यावद्धूमज्ञानं॥ योगजधर्मेण योगिनां सर्वज्ञानम्॥ तत्र निर्विकल्पकं
विशेष्यत्वप्रकारतादिरहितवस्तुस्वरूपमात्रज्ञानम्॥ सविकल्पकं सप्रकारकम्॥ प्रका
समां वैशिष्ट्यप्रतियोगित्वं प्रकारत्वम्॥ यथायं घट इत्यत्रायं विशेष्यं प्रकारः॥ प्रास
मानवैशिष्ट्यमनेन योऽस्य समवायः॥ तस्य प्रतियोगि घटत्वम्॥ सविकल्पकमेव वि
शिष्टवैशिष्ट्यज्ञानम्॥ यथा दंडी॥ अत्र दंडत्वविशिष्टवैशिष्ट्यं पुरुषे भासते॥ न
[illegible]॥ आदाविन्द्रियसन्निकर्षेण घट घटत्वे इति निर्विकल्पकम्॥ ततोऽयं घट इति
विशिष्टज्ञानम्॥ तत्र परतः प्रामाण्यग्रह इति नैयायिकाः॥ यथा आदौ घट इति व्य

वसायः ततो घटमहं जानामीत्यनुव्यवसायः ॥ ततः प्रामाण्याप्रामाण्योरिति कोटिद्वयस्म
रणम् ॥ ततः इदं ज्ञानं प्रमा न वेति प्रामाण्यसंशयः ततो विशेषदर्शनानन्तरं प्रामाण्य
ग्रहः ॥ २ ॥ देशोऽप्रमासमर्थप्रवृत्तिजनकत्वान्नाज्ञानान्तरवत् । स्वतः प्रामाण्यग्रह इति
त्रयो मीमांसकाः ॥ तत्र गुरुमते । अयं घट इति ज्ञानं विषयं प्रकाशमानं ज्ञानप्रामाण्यं च
गृह्णाति ॥ मुरारिमिश्रमते । अयं घट इति ज्ञानानन्तरं घटमहं जानामीत्यनुव्यवसा
यः ॥ तेनैव प्रामाण्यग्रहः ॥ भट्टमते ज्ञानस्यातीन्द्रियत्वेन ज्ञानमनुमेयं यथा तथा प्रा
माण्यम् ॥ यथा अयं घट इति ज्ञानानन्तरं घटे ज्ञातता उत्पद्यते । ततो ज्ञाततया घट इ
ति ज्ञानज्ञातताप्रसदम् ॥ ततो व्याप्त्यादिप्रसादानन्तरं ज्ञानानुमानम् ॥ यथा अहं घटत्वप्र
कारकज्ञानवान् घटत्वप्रकारकज्ञाततावत्त्वात् ॥ तावत्तैव तस्य धर्मे धर्मिवि

षयकत्वेन प्रमाणत्वानुमानम्॥ इति प्रत्यक्षप्रमाणम्॥ अनुमितिकरणमनुमानम्॥
ऽनुमितिसंज्ञातिः॥ व्यापारवत्कारणं करणम्॥ व्यापारश्च तज्जन्यत्वे सति तज्ज
ऽज्ञेन्यजनकः॥ हेतुज्ञानादि करणम्॥ परामर्शो व्यापारः॥ परामर्शश्च व्याप्तिवि
शिष्टपक्षधर्मताज्ञानम्॥ यथा वह्निव्याप्यधूमवानयमिति॥ अत्रादौ महानसादौ
धूमवह्निसामानाधिकरण्यग्रहे सति धूमो वह्निव्याप्य इति ग्रहो जायते॥ ततः स्था
नान्तरे पर्वते धूमे दृष्टे सति व्याप्तिस्मरणम्॥ ततश्च विशिष्टवैशिष्ट्यज्ञानं वह्निव्याप्य
धूमवानयमिति तृतीयलिंगपरामर्शः॥ यत्र सन्निहिते नतेन पर्वतो वह्निमानि
त्यनुमितिर्जन्यते॥ व्याप्तिस्तु हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामा

ति१

ता२

नाधिकरणम्॥ न चायं संयोगवान् द्रव्यत्वात्॥ इत्यत्राव्याप्तिः॥ प्रतियोगिव्यधिकरणस्वं ताभावाप्रतियोगिसाध्यसामानाधिकरणमितिसर्थः॥ पक्षता च सिषाधयिषाविरहसहकृतसिद्ध्यभावः॥ अनुमानं द्विविधम्॥ स्वार्थं परार्थं च॥ तत्र परार्थं पंचावयवसाध्यम्॥ अवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि॥ यथायं वह्निमान् धूमात् यत्र यत्र धूमस्तत्र तत्र वह्निः यथा महानसम्॥ वह्निव्याप्यधूमवान्चायं तस्माद्वह्निमान्॥ स्वार्थं च स्वीयव्याप्त्यादिज्ञानसाध्यम्॥ तत्र परप्रतिपत्त्यर्थमेवाह शब्दप्रयोगम्॥ तच्चानुमानं त्रिविधम्॥ केवलान्वयि केवलव्यतिरेकि अन्वयव्यतिरेकि भेदात्॥ यत्र साध्यव्यतिरेको न कुत्रापि सिद्ध

केवलान्वयी॥ यथा घटोभिधेयः प्रमेयत्वात्॥ इत्यत्राभिधेयत्वस्य साध्यस्य व्यतिरेका
प्रसिद्धेः॥ यत्र साध्यप्रसिद्धिः पक्षातिरिक्ते नास्ति स केवलव्यतिरेकी॥ यथा पृथिवी
इतरेभ्यो भिद्यते गंधवत्वात्॥ यद्येतरभेदाभावः तत्र गंधवत्वाभावः॥ यथा जला
दि॥ व्यतिरेकव्याप्तौ साध्याभावो व्याप्यः॥ हेत्वभावो व्यापकः॥ सोन्वयव्यतिरेकी
यत्र साध्यं साध्याभावश्चान्यत्र प्रसिद्धः॥ यथा पर्वतो वह्निमान् इत्यत्र॥ अन्वय
व्यतिरेकिणि हेतौ अवश्यं पंचरूपो अपेक्षणीयः॥ पक्षसत्वं सपक्षसत्वं विपक्षव्या
वृत्तत्वम् अबाधितत्वम्॥ असत्प्रतिपक्षितत्वम्॥ चेति रूपाणि॥ केवलान्वयिनि
विपक्षव्यावृत्तत्वरहितम्॥ केवलव्यतिरेकिणि सपक्षसत्वरहितं रूपचतुष्टयमेवापे

त०सं०

१४

न्दितम्॥ पक्षसाध्यसंदेहः स्वपक्षः॥ पक्षसाध्यनिश्चयः सः सपक्षः॥ पक्षसाध्याभावनि
श्चयः स विपक्षः॥ साध्याभाववान् पक्षो बाधः॥ साध्यविरोधिसाधको हेतुः स
त्प्रतिपक्षः॥ सोपाधौ सपक्षसत्वाद्यन्यतमभंगश्च व्यापकः॥ सोपाधिश्च सव्यभि
चारितासंबंधेन उपाधिविशिष्टः॥ उपाधिस्त्रिविधः॥ साधनाव्यापकत्वे सति शुद्ध
साध्यव्यापकः॥ साधनाव्यापकत्वे सति पक्षधर्मावच्छिन्नसाध्यव्यापकः॥ सा
…यासागरं श्रीनीलाचलनाथसेवनपरं श्रस्मारमार्यं
… ८ श्रीमन्मारदकुलवारिधिश्रोतभानुं रामानु

…य्यतनयोत्तममम्बुजाङ्घ्रिम् ॥ सेवे सदा सजगता
…प नाथभाजं भजे तथापि ममनाथमनन्यभावम् ९
…आलंकायनवंशदुग्धजलधेराकासुधादीधितिं श्रीरा
मानुजयोगिदेहजवरं तत्पादपद्माश्रयम् ॥ भक्तानु
ग्रहपारतन्त्र्यसुभगं श्री२निवासार्य्यसत्पौत्रं श्रेष्ठगुणं
नमामि शिरसा श्रीनिवासंगुरुम् १० श्रीनिवासगुरो
पादसरसीरुहषट्पदम् ॥ वेदान्तद्वयसारज्ञं रा

मानुजगुरुम्भजे ११ वेङ्कटार्य्यपदाम्भोजद्वन्द्वप्रवणमा
नसम् ॥ तत्सूनुतत्कृपापात्रं श्रीनिवासगुरुम्भजे १२
वेदान्तदेशिककटाक्षविवृद्धबोधं कान्तोपयन्तृयमि
नः करुणैकपात्रम् ॥ वत्सान्ववायमनवद्यगुणैरुपेतं
भक्त्याभजामिपरवादिभयंकरार्य्यम् १३ श्रीशैलेश
यापात्रंधीभक्त्यादिगुणार्णवम् ॥ यतीन्द्रप्रवणं वन्दे र
जामातरंमुनिम् १४ नमःश्रीशैलनाथायकुन्तीनग

न्मने ॥ प्रसादलब्धपरमप्राप्यकैङ्कर्य्यशालिने १५
काचार्य्यायगुरवेकृष्णपादस्यसूनवे ॥ संसारभो
गिसन्दष्टजीवजीवातवेनमः १६ श्रीकृष्णपादपादा
ब्जेनमामिशिरसासदा ॥ यत्प्रसादप्रभावेनसर्वसि
द्धिरभून्मम १७ वेदान्तवेद्यामृतवारिराशेर्वेदार्थसा
रामृतपूरमग्र्यम् ॥ आदायवर्षन्तमहंप्रपद्ये कारुण्य
पूर्णंकलिवैरिदासम् १८ नमोवेदांतवेद्यायजगन्मंग

लहेतवे ॥ यस्यवागमृतासारपूरितंभुवनत्रयम् १९
श्रीपराशरभट्टार्य्यः श्रीरंगेशपुरोहितः ॥ श्रीवत्सा
ङ्कसुतःश्रीमान् श्रेयसेमेस्तुभूयसे २० रामानुज
पदच्छाया गोविन्दाह्वानपायिनी ॥ तदायत्तस्व
रूपासाजीयान्मद्विश्रमस्थली २१ योनित्यमच्युत
[...]दांबुजयुग्मरुक्म व्यामोहितस्तदितराणितृणायमे
अस्मद्गुरोर्भगवतोस्यदयैकसिन्धोरामानुजस्य


[...]णौशरणंप्रपद्ये २२ कमलापतिकल्याणगुणामृत
[...]निषेवया ॥ पूर्णकामायसततंपूर्णायमहतेनमः २३
यत्पादांभोरुहध्यानविध्वस्ताशेषकल्मषः ॥ वस्तु
तामुपयातोहंयामुनेयंनमामितम् २४ अचलतोयां
मुनमात्मदासमलर्कपत्रार्पणनिष्क्रयेण ॥ यःक्रीत
वानस्थितयौवराज्यं नमामितंराममेयसत्त्वम् २५
नमःपङ्कजनेत्राय नाथश्रीपादपंकजे ॥ न्यस्तसर्वभरा

याम त्कुलनाथायधीमते २६ नमोचिंत्याद्भुतक्लि
ष्टज्ञानवैराग्यराशये ॥ नथायमुनयेगाधभगवद्भ
क्तिसिन्धवे २७ मातापितायुवतयस्तनयाविभूतिः
सर्वंयदेवनियमेनमदन्वयानाम् ॥ आद्यस्यनःकुल
पतेर्वकुलाभिरामं ॥ श्रीमत्तदंघ्रियुगलंप्रणमामिमू
र्ध्ना २८ भूतंसरश्चमहदाह्वयभट्टनाथश्रीभक्तिसार
कुलशेखरयोगिवाहान् ॥ भक्तांघ्रिरेणुपरकालयती

न्द्रमिश्रान्श्रीमत्परांकुशमुनिंप्रणतोस्मिनित्यम् २९
गुरुमुखमनधित्यप्राहवेदान्तशेषान् नरपतिपरि
क्लप्तंशुल्कमादातुकामः॥ श्वसुरममरवंद्यंश्रीरङ्गनाथ
स्यसाक्षाद्द्विजकुलतिलकंतंविष्णुचित्तंनमामि ३०
श्रीरंगचन्द्रमसमिन्दिरयाविहर्तुं विन्यस्य विश्वचिद
चिन्नयनाधिकारं ॥ योनिर्वहत्यनिशमंगुलिमुद्रयैव
सेनान्यमन्यविमुखास्तमशिश्रयामः ३१ नमःश्रीरङ्ग

नायक्यैयद्भ्रुविभ्रमभेदतः ॥ धूम्रो मितव्यवेयस्यनि
म्नोऽन्ततमिदंजगत् ३२ श्रीरत्नाभरणंतेजःश्रीरङ्गेश
यमाश्रये ॥ चिन्तामणिमिवोद्भ्रान्त मुत्संगेनंतभो
गिनः ३३ नमोऽस्मदाचार्य्यपरम्पराभ्योनमोभागवत
व्रजेभ्योनमोनमोऽनन्तमुखासरेभ्यो नमः श्रियैः पतये
नमोस्तु ॥ ३३ ॥ इतिगुरुपरम्परासम्पूर्णम् ॥

इदंपुस्तकं भारतभाता यन्त्रालयं मुद्राङ्कित्वा सं० १९४६



अबांधवायेन्यजन्मनिबांधवाः तेतृप्तिमखिलायांतुय-
श्चास्मत्तोभिवांछति इदंचकाम्यतर्पणमेभिरेवश्लोकैर्दे
वविधिनाकर्त्तव्यम् इतितर्पणंसमाप्तम् शुभंभवतु

इदं पुस्तकं भगीरथात्मज हरिप्रसादेन मोहमय्यां जगदीश्वराख्य शिलायंत्रे मुद्रितम् सं॰ १९३८
यह पुस्तक मुंबई विठ्ठलवाडीमें शेठ त्रिभुवनदास जगजीवनदासके मकानमें मिलेंगे.

त· ६

वः पितरोदेष्मैतद्वः पितरोवासइतिमंत्रंपठित्वा ॐ अद्यामुकगोत्रोमातामहोऽमुकशर्मातृप्यतामिदंजलंसतिलंतस्मैस्वधाइतिमातामहायांजलित्रयंदद्यात् एवंप्रमातामहायवृद्धप्रमातामहायच ततॐ अद्यअमुकगोत्रामाता अमुकदेवीतृप्यतामिदंजलंसतिलंतस्मैस्वधेतिमातरं एवमेवपितामहीप्रपितामहीमातामहीप्रमातामहीवृद्धप्रमातामहीस्तर्पयेत् ततआचार्यादीन्नाम

पं· ६

गोत्रस्वधाकारैस्तर्पयेत् विष्णुपुराणे इदंचापिजपेदंबुददात्स्वेच्छयानृप उपकारायभूतानांकृतदेवादितर्पणः देवासुरास्तथायक्षानागागंधर्वराक्षसाः पिशाचागुह्यकाःसिद्धाःकूष्मांडास्तरवःखगाः जलेचराभूनिलयावाय्वाधाराश्चजंतवः प्रीतिमेतेप्रयांत्वाशुमद्दत्तेनांबुनाखिलाः ॐ नरकेषुसमस्तेषुयातनासुचयेस्थिताः तेषामाप्यायनायैतद्दीयतेसलिलंमया ॐ येबांधवा

द्वितीयांजलिं ॐ मधुमान्नोवनस्पतिर्मधुमांअस्तु सूर्यः
माध्वीर्गावोभवंतुन इति मंत्रेण वाक्येनच तृतीयांजलिं
प्रपितामहाय दद्यात् ततॐ तृप्यध्वंतृप्यध्वंतृप्यध्व-
मिति पित्रादिभ्योंऽजलित्रयंदद्यात् ॐ नमोवः पितरोर
सायनमोवः पितरः शोषायनमोवः पितरोजीवायनमो-
वः पितरः स्वधायैनमोवः पितरोघोरायनमोवः पितरोम
न्यवेनमोवः पितरः पितरोनमोवोगृहान्नः पितरोदत्तसतो

उमा के विवाह में जो व्योहार आया उनकी तफसील मिती [illegible]
फागुन सुदी ६ मंगलवार संवत १९८८

४) शम्भूनाथ दादा पांडे वालों की
लहंगा दुपट्टा १
२) प्रेमनाथ पांडे मोहनलालगंज
धोती २
५) जयशंकर पांडे अटेरा धोती १
२) नन्हकू पांडे धोती १
२) विश्राम पांडे मोहनलालगंज
लहंगा दुपट्टा
२) मनफूल दीक्षित की दुलहिन
गोला बटुवा समेत
२) रामचंद्र पांडे धोती १
२) सावदेव बाजपेई लहंगा दुपट्टा १
२) मांई की बिटिया गोला बटुवा समेत
११) [illegible] काकी पेटार
११) शिवनाथ पत्र शिवदत्त
१) गुल्ला की अम्मा
१) महेश बाजपेई गोला बटुवा समेत
२) पंचानन चाचा टकुलिया १
२) रामलाल डाक्टर टकुलिया १
२) छोटकऊ की दुलहिन की बहिनी
१) [illegible]
५) नानी के आये
२) [illegible] प्रसाद के आये

उमाके विवाहमें जो लो

थे पदी १ मंगल पा गंबून १

४) कल्पेवामागपे विधिपांकेपहां

४) लम्बकोरौं तूताका

४) विधि पाकी यों मायचीभवे

मिती चैत बदी १२ शनीवा

सं: १९५८

चदर डेढ पाट विछाने का १

चदर चपूका १

धोती जनानी २ दो इकलाई दो मे
इक नारंगी कपड़
इक धोड़ी वे ब १

धोती मरदानी २
नारंगी किनार

गिदी ४

बोरवा लपेटा २

थैली १

मकड़ का जाला नि सा १

प्रेगो घा चौड़ा

डायैविच्चेकरतलकरपष्ठाभ्यांफट्॥ ॐ ऐं हृ
दयायनमः॥ ॐ ह्रीं शिरसिस्वाहा॥ ॐ क्लीं शि
खायैवौषट्॥ ॐ ऐं ह्रीं क्लीं चामुंडायैविच्चे॥
स्त्रायफट्॥ अथध्यानं॥ खड्गंचक्रगदेषुचा
पपरिघान्शूलंभुशुंडींशिरःशंखंसंदधती
तींकरैस्त्रिनयनांसर्वांगभूषावृतांमहा

दु०न०
३

हंतुमभ्युद्यतेरमोजलजन्मस्तुष्टाव सुमेहरे॥
नीलरस्मद्युतिमास्यपाददशकां सेवे महाका
लिकां॥१॥ अक्षस्रक्परशुंगदेषुकुलिशंप
द्मं धनुः कुण्डिकां दंडं शक्तिमसिं च चर्मजल
जं घंटां सुराभाजनं। शूलंपाशसुदर्शनेच
दधतींहस्तैःप्रवालप्रभां। सेवे सैरिभमर्दिनी

३

नीयारत्नबीजासनी।।८१।।ः श्रुतनिर्गुणदे
त्यदलनीयासिद्धिलक्ष्मीपरा।।सा देवी नव
कोटिमूर्तिसहितारक्षंतुमांसर्वदा।।इति नि
वारणीमंत्रनाः संध्यानसमाप्तः श्रीसम्वत्
१८३२ आषाढशुक्ल।प्रथम्पा रविवासरे।।

मिहमहालक्ष्मींसरोजस्थितां॥घंटाशूलह
लानिशंखमुशलेचक्रंधनुःसायकं॥हस्ता-
ब्जैर्दधतींघनांतविलसच्छीतांशुतुल्यप्र-
भां॥गौरीदेहसमुद्भवांत्रिजगतामाधारभूतां
महापूर्वामत्रसरस्वतीमनुभजेशुंभादिदै-
त्यार्दिनीं॥३॥याचंडीमधुकैटभैटैत्यदलनीया
माहिषोन्मूलनीयाधूम्रेक्षणचंडमुंडमथ

दु०नं०
२

दंतिकादुर्गाभ्रामरीबीजेभ्योनमोवामस्त
नेःअग्निवायुसूर्य्येभ्यस्तत्वेभ्योनमोहृदि
मूलेनषडौसंशोध्या।ॐऐंअंगुष्ठाभ्यांनमः
ॐह्रींतर्जनीभ्यांस्वाहा।ॐक्लींमध्यमाभ्यां
वषट्।ॐचामुंडायैअनामिकाभ्यांहुं।ॐवि
च्चेकनिष्ठिकाभ्यांवौषट्।ॐऐंह्रींक्लींचामु

२

हालक्ष्मीमहासरस्वतीप्रीत्यर्थेजपेविनियो
गः॥ॐब्रह्माविष्णुमहेश्वरेभ्योऋषिभ्योन
मःशिरसि।गायत्र्युष्णिगनुष्टुप्छंदेभ्योनमो
मुखे।महाकालीमहालक्ष्मीमहासरस्वती
भ्योदेवताभ्योनमोहृदये।नंदाशाकंभरी-
भीमाःशक्तिभ्योनमोदक्षिणस्तने।रक्त

दु० नं० १

श्रीगणेशायनमः॥ॐअस्यश्रीनवार्णव
मंत्रस्यब्रह्माविष्णुमहेश्वराऋषयःगाय
त्र्युष्णिगनुष्टुप्छंदांसिमहाकालीमहाल
क्ष्मीमहासरस्वत्योदेवतानंदाशाकंभरीभी
माःशक्तयःरक्तदंतिकादुर्गाभ्रामर्योबीजा
नि अग्निवायुसूर्यास्तत्वानि महाकालीम

१



कहम पंक्षो दिवा हाक्म शुकपंखो पदाति छि
न फारि ष्टल काताप्ये याद वस्थो मेसरी

कलकत्ता मुकाम बांस
[illegible] स्ट्रीट नबर २५ पुल
[illegible] वाले

श्रीरस्तु

श्रीमद्भागवतस्य पाठः
पञ्चमस्कन्धपर्यन्तं कृ
तः षष्ठस्कन्धमारभ्य
पुनः कर्त्तव्यः॥ शुभमस्तु


पुनः नवमस्कन्दप
र्यन्तं पाठः कृतः॥

श्री राम


श्री गणेशाय नमः ॥ अगस्त्य संहितायामुक्तं रामजन्माह ॥ चैत्रे नवम्यां प्राक पक्षे दिवा पुण्ये पुनर्वसौ ॥ उदये गुरु गौरांशे स्वोच्चस्थे ग्रह पञ्चके ॥१॥ मेषे पूषणि सम्प्राप्ते लग्ने च कर्कटाह्वये ॥ आविरासीत्सकलया कौशल्यायां परः पुमान् ॥२॥


श्री रामजन्मसमयः

[illegible] ज्ञाउब्दी [illegible] दिलीपः



उच्चस्थाः। सू१ मं २ वृ ३ शु ४ श ५





श्रीगणेशायनमः

स्तो२

यं गायन्ति समस्तवेदनिवहा ध्यायन्ति यं योगि
नो यस्याज्ञामपि दिग्गजादेवतगणाऽ कुर्वन्ति
सद्ध्यादिकं ॥ सोऽयं त्वामवतान्निराकृति
रपि त्वा तुं जगत्साकृतिः ध्यायन् स्वं स्वयमे
व सर्वजगती शिक्षाकरः शङ्करः ॥१॥ ऽव्या
धिना शरीरेण मनसा च निराधिना ॥ पू
रयन्नर्थिनामाशां त्वं जीव शरदां शतम् ॥२॥

सौवर्णं लोहरौप्यं वा ताम्राद्यश्ममयं च वा ॥ ऽप्रश्नन्
भिक्षुर्न दुष्येत दुष्यतेतु परिग्रहात ॥१॥
यतीनां कञ्चनं दद्यात्ताम्बूलं ब्रह्मचारिणां चौराणा
मभयं दत्वा दातापि नरकं व्रजेत ॥१॥
एकदण्डी त्रिदण्डी वा शिखी मुण्डी तथैव च काषाय
मात्रधारोऽपि यती पूज्यो युधिष्ठिर ॥१॥
देहरूपे वासुदेवस्य [illegible] मेव च चलं संन्या
[illegible] तं प्रतिमादिकम् ॥७॥
सिनां रू [illegible]


व्यासादिऋषिसमूहः
श्रीकृष्णः
स्तंभः
होमकुंडम्
पांडवादिराजसमूहः
अश्वः

॥ अथजैमिनिअश्वमेधप्रारंभः ॥



श्रीगणेशाय नमः पितुः स्कंधे स्थित्वा विमलमुकुरालोकनधिया हिमांशुं व्याकर्षन् हिम
पविद्धेन मनसा विधुं हित्वा वह्निं सरसमणिबुध्या गिरिसुता शुभं भीतो नीतो दिशतु बहुवः शंभुतनयः १
गंगे त्वद्वारिधारा भवमरणजरापारवीरा सुसारा राजद्देवादिनारी विहरणविलसत्तीरनीरा तु भारा दैत्यारातेः
श्चिचाराहरगिरिसुतशिरो देहभारा तिधीरा रूपेण क्रांतमारा निजजनवृजिनौघौघहारा विहारा २ ध्रुवानि
जमुखाक्रांतचंद्रविंबां नमाम्यहम् केदारं वैरिसंदारं मुक्ताहारं च सुंदरम् ३ येनाकारि दशास्योदशमुखही
नोपि बाणां सद्वेन वनजायाश्चौर्य्यकरो सो बोरवतु जानकीकांतः ४ हरिरामं गुरुं नत्वा भास्करप्रीतये मया
पीयूषलहरीव्याख्या क्रियते हि यथामति ५ अथैवं श्रूयते कविर्जगन्नाथो दिल्लीवल्लभाश्रितस्तद्य
वनी संसर्गदोषभाक् सन् गंगासकाशात् द्विपंचाशत्सोपानांतरित निजगृहे स्थितः सन् तत्रैव जाह्नव्या
गमनस्पर्शनेनात्मशुद्धिं कामयमानः सन् काव्यं यशसेर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः प
रनिर्वृतये कांतासंमिततयोपदेशयुज इति काव्यप्रकाशोक्तेः शिवेतरक्षतिफलकं गंगास्तुतिरूपं का
व्यं चिकीर्षुर्विघ्नविघातायवस्तुनिर्देशात्मकं मंगलमाचरन् स्वाभिमतं प्रार्थयते समृद्धमिति भो गंगे ते
तव युष्मदः षष्ठ्येकवचनविशिष्टस्य ते मया वेकवचनस्येति ते आदेशः युष्मदर्थश्च संबोध्यः युष्म

दः सेवोध्यस्त्वं तत्रः कर्ता अस्मदीयाच्चः इत्यभियुक्तोक्तेरित्याद्यन्यत्र विस्तरः ततसलिलम् सलति भक्त
जनपापादिनाशाय गच्छतीति सलिलं जलम् षल गतौ सलिकलीत्युणादिसूत्रेणेलच् सलिलं कम
लं जलमित्यमरः एवं चाशिवनाशनप्रार्थनं युक्तमिति भावः नः अस्माकमशिवं अकल्याणम् शमय
तु नाशयतु प्रार्थनायां लोट् ततकिम् यतसलिलं सकलवसुधायाः सकलाचासौवसुधाचेसौवीति
स्याः वसुधोर्वीवसुंधरेत्यमरः यद्वा कलाभिःसहितासकला वसुधनंधत्ते इतिवसुधा सकलाचासौ
वसुधाचतस्याः किमपि अनिर्वचनीयममौल्यंवा समृद्धंसौभाग्यंशोभादायकं अपि चतुरायाः सधना
याः अपि पृथिव्याः गंगासलिलं विना न शोभेति लोकेऽपि अपि चतुरायास्ताटंकनूपुराद्यलंकारसहिता
याः अपि प्रम[illegible] दयाः कुंकुमकृष्णामणिभिर्विना न शोभा भवतीत्याद्यमरप्रसिद्धम् पुनस्तत् किम् य
त् लीलाजनितजगतः लीलया विलासेन न तु श्रमेण जनितान्युत्पादितानि जगंति चतुर्दशभुवनानि

॰ समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्महैश्वर्यं लीलाजनितजगतः खंडपरशोः ॰

येन सः तस्य खंडपरशोः खंडयति रिपून् हिनस्तीति खंडः तादृशः परशुः शस्त्रविशेषो यस्य भूतेशस्य भूते
शः खंडपरशुरित्यमरः महैश्वर्यं महच्चैतदैश्वर्यं च महाविभूतिभूतम् विभूतिर्भूतिरैश्वर्यमित्यमरः

सन्महदिति समासे आङ् महदित्यात्वे वृद्धिः गंगासलिलमात्रसहायेनेश्वरेण विलासादेव चतुर्दशभुवनानि
कृतानीति भावः लोकेपि कश्चन धने सहाये सति लीलया बृहत्पुर्यादिकं निर्मातीति प्रसिद्धम् पुनः तत
किम् यत् श्रुतीनां श्रूयते धर्म्मो याभिस्ताः श्रुतयः चत्वारो वेदाः श्रुजीत्यादिनाक्तिन् श्रुति स्त्री वेद आम्ना
म्नाय इत्यमरः तेषां सर्वस्वं सर्वं च तत् स्वं च सर्वस्वम् इदमेव वेदानां धनमिति भावः यद्वा सर्वं च तत् स्वं च आत्मा
इदं सलिलमेव वेदानामात्मेति भावः स्वो ज्ञाताबात्मनि स्वं त्रिष्वात्मीये स्वोस्त्रियां धन इत्यमरः पुनस्तत्किम्
अथ यत् सुमनसां सुपर्वणाम् सुपर्वाणः सुमनस इत्यमरः मूर्त्तं सशरीरं सुकृतं पुण्यम् स्याद्धर्म्ममस्त्रियां पुण्य
श्रेयसी सुकृतं वृष इत्यमरः पुनस्तत्किम् यत्सुधासौन्दर्यं सुधेवामृतमिव सौन्दर्यं यस्य तत् अतिशुभ्रमित्यर्थः

श्रुतीनां सर्वस्वं सुकृतमथ मूर्त्तं सुमनसां सुधासौंदर्यं ते सलिलमशिवं नः शमयतु १

मधुरास्वादत्वाच्चिरजीवित्वादि तत्कार्यकारीति वा यद्वा सुधासौदर्यमिति वा पाठः सुधेति पृथक्पदम् चंद्रोसु
रवमिति वृत्त सलिलविशेषणम् पुनस्तत्किम् सोदर्यं सम्यक् दरी हिमाचलकंदरं तत्र भवं सोदरं मत्वार्थे रण
सोदरमेव सौदर्यमिति चातुर्वर्ण्यादित्वात् ष्यञ् अर्थाद् हिमाचले प्रकाशितमिति भावः अथ वा सुधायाः सोदर्यं
भ्रातृरूपम् सोदराद्यदिति यः अत्र दरस्मितमिति श्लोकपर्यंतं शिखरिणी छंदः तल्लक्षणं तु रसै रुद्रैश्छि
न्ना यमनसभलागः शिखरिणीति वृत्तरत्नाकरोक्तम् शिखरिणी य्मौ न्सौ म्लौ गृ तु रुद्रा इति पैंगलं च बोध्यम्
ननु छंदोंतरं त्यक्त्वा अनेनैव छंदसा किमिति वर्णनमिति चेदुच्यते शिखरिणी छंदसि जलदेवताक यगण
स्यादौ सत्त्वेन जलस्पर्शरूपाभिमतफलसिद्धिर्भविष्यतीत्याशयेन अशोकवनिकान्यायेन वेति कृतधियो

तदुक्तम् गोभूमिः श्रियमातनोति च जलं वृष्टीरवह्निः स्मृतिं सो वायुः परदेशदूरगमनं तत्व्योमयत्नं फलम्
जः सूर्यो रुजमादधाति विपुलं भेदुर्यशो निर्मलं नो नाकः सुखमीप्सितं फलमिदं प्राहुर्गणानां बुधा इति
किमपितन इत्येकं पदं वा किमपि अनिर्वचनीयं मोक्षप्राप्तिरूपफलम् तनोति विस्तारयतीति किमपितन
तनु विस्तारे क्विप् एतत्पक्षे कथंभूतं जलमिति शेषः अत्र वाचकलुप्तोपमालंकारः तदुक्तम् उपमा यत्र
सादृश्यलक्ष्मीरुल्लसति द्वयोरिति समृद्धं सौभाग्यमिति अत्रादौ रूपकं च एवं च रूपकोपमयोः संकरः १ इदानीं
प्रवाहरूपत्वेन जलं वर्णयन् स्वाभिमतं प्रार्थयते दरिद्रेति भो गंगे इहास्मिन् लोके ते तव वारां अपां आपः स्त्री
भूम्नि वार्वारि इत्यमरः अयं पुरोवर्त्ती सन्निकृष्टः इदमस्त्वर्थः तदुक्तम् इदमस्तु सन्निकृष्टं समीपवर्त्ति चैतदो

दरिद्राणां दैन्यं दुरितमथ दुर्वासनहृदां द्रुतं दूरीकुर्वन् सकृदपि गतो दृष्टिसरणिम्

रूपम् अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादिति प्रवाहो निर्झरः प्रवाहो निर्झरो झर इत्यमरः नः अ
स्माकं अपारं अनंतां श्रियं दिशतु ददातु दिश अतिसर्जने इति धातोः प्रार्थनायां लोट् अतिसर्जनं दान
म् किं कुर्वन् सन् दृष्टिसरणिं नेत्रमार्गम् सरणिः पद्धतिः पद्येत्यमरः सकृदपि एकवारमपि गतः सन् प्राप्तः
सन् दरिद्राणां रंकाणां दैन्यं दीनताम् अथानंतरं दुर्वासनहृदां दुष्टा वासना यस्य तद् दुर्वासनं तादृशं हृत् येषां तेषां
स्वान्तं हृन्मानसं मन इत्यमरः दुरितमपि पापमपि अंहो दुरितदुष्कृतमित्यमरः द्रुतं शीघ्रं दूरीकुर्वन् अद्भुत
तन्निवृत्तिः कुगतीति समासः कथंभूतः प्रवाहः नागाविघाद्रुमदलनदीक्षागुरुः आसमंताद् विघाः मार्गाः

आविद्याः अखिलाः अविद्या इत्यर्थः मायावहुत्वे प्रमाणं तु इन्द्रो मायाभिरिति श्रुतौ वहुवचनम् अत एव तत्त्वज्ञानोद
कस्य मुक्तौ कृत्स्नमुक्तिप्रसंगः स्यात् मायैक्ये न तन्निवृत्तौ क्वापि संसाराभावादिति शंकालेशोपि नेति शंकरभाष्या
दिग्रंथेभ्योऽवधेयमिति दिक् तद्रूपो यो द्रुमः वृक्षः तस्य दलनं छेदनं द्रागविद्याद्रुमदलनं तस्य दीक्षा उपदेशः
तस्याः गुरुः वोधकः अत्रापि दृढविसरणिः सकृदपि गतः सन्निति योजनीयम् सकृत्प्रवाहदर्शनेनाविद्या
गच्छतीति भावः द्रागविद्यद्रुमेति वा पाठः अज्ञा रविद्यायाः इमे आविद्याः ते च ते द्रुमाश्च शेषं पूर्ववत् २ इदानीं
तरंगरूपत्वेन जलं वर्णयन्नाशिषं प्रयुंजते उदंचदिति गंगातनुभुवः गंगायास्तनुः मूर्तिः स्त्रियां मूर्तिस्त

० अयि द्रागविद्याद्रुमदलनदीक्षागुरुरिह प्रवाहस्ते वारां श्रियमयमपारां दिशतु नः २
० उदंचन्मार्तंडस्फुरटकपटहेरंवजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः

नुस्तनूरित्यमरः तस्याः भवंतीति गंगातनुभुवः भवतेः क्विप् नभ्रूसुधियोरिति यणनिषेधादुवङ् उत्तुंगाः
उन्नताः एतादृशास्तरंगा ऊर्मयः भंगस्तरंग ऊर्मिर्वेत्यमरः भवतां भक्तजनानां दुरितभयभंगाय दुरितं च
भयं च तयोर्भंगाय नाशाय क्रियार्थोपपदेति चतुर्थी भवंतु आशिषि लोट् कथंभूतास्तरंगाः उदंचन्मार्तंड
स्फुरटकपटहेरंवजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः हे शिवे रंवते शब्दं करोतीति हेरंवः लं
वोदरः हः शंकरे हरौ हंसे रणे रोमांचवाजिषु इति नानार्थमंजरी अविरविशब्द पचाद्यच् तत्पुरुषे कृतीति स
प्तम्या अलुक् अथ एकदंतहेरंवलंबोदरगजाननेत्यमरः हेरंवस्य जननी माता पार्वती तस्याः कटाक्षाः अ
पांगदर्शनानि कटाक्षोऽपांगदर्शनमित्यमरः स्फुरटं च तत्कपटं च व्याजं च कपटोऽस्त्री व्याजे इत्यमरः स्फुर

टकपटेन हे अंबजननीकटाक्षाः उदंचन् उदयं प्राप्नुवन् यो मार्त्तंडः अर्कः विकर्त्तनार्कमार्त्तंडेत्यमरः उ
दंचन्मार्त्तंडवत् स्फुरत्कपट हे अंबजननीकटाक्षाः आतिरश्चा इत्यर्थः तेषां व्याक्षेपः विलंबः चिरकाल
पर्यंतं कटाक्षस्थितिरित्यर्थः यद्वा व्याक्षेपः संबंधः तेन क्षणं क्षणपर्यंतं जनितः उत्पादितः तादृशाः
संक्षोभनिवहो भयसमूहो येषां ते पुनः कथंभूताः अतएव हरशिरसि स्वाधारभूते महादेवमस्तके त्वंग
तः कंपंतः इतस्ततो गच्छंतो वा त्वगि कंपने इत्यस्मात् उखउखीति दंडके पठितगमनार्थकात्वादुभयार्थ
कत्वम् क्वचित्तु उदंचन्मार्त्तंडेति पाठः तत्र सापत्न्याभावादुदंचन्मार्त्तंडेति व्याख्येयम् ३ इदानीं

॰अवंतु त्वंगंतो हरशिरसि गंगातनुभुवस्तरंगाः प्रोत्तुंगा दुरितभयभंगाय भवताम् ३
॰तवालंबादंबस्फुरदलघुगर्वेण सहसा मया सर्वेऽवज्ञासरणिमथ नीताः सुरगणाः

तवालंबान्मया सर्वे सुरगणास्तृणप्रायीकृताः अधुना यदि त्वमेकाप्यकरुणोदासीना तर्हि अहं केषाम
ग्रे दैन्यं करोमीत्याह तवेति भो अंबजननि अंबार्थनद्योरिति ह्रस्वः तवालंबादाश्रयात् स्फुरदल
घुगर्वेण स्फुरन् देदीप्यमानः अलघुर्महान् गर्वो अहंकारो यस्य तेन मया सर्वे सुरगणाः अवज्ञास
रणिं अवज्ञाया अवहेलनस्य सरणिं सहसा अविचारेण नीताः प्रापिताः अत्र प्रधानकर्म्म
ण्याख्येये लादीनाहुर्द्विकर्म्मणामिति भाष्योक्तेः सुरगणरूपे प्रधानकर्म्मणि क्तः अतएवाभिहित
त्वात्तत्र प्रथमेति दिक् भो भागीरथि भगीरथस्येयं भागीरथी तत्संबोधनम् तस्येदमित्यण् टिड्ढाण

इदानीमुद्धारसमये यदि श्रो मातस्त्वं उदासीनत्वं उद्धारानुकूलव्यापारशून्यत्वमित्यर्थः भजसि अंगीकरोषि तदा
तर्हि निराधारः निर्गतः आधारो यस्य सः एतादृशोऽहं इहलोके केषां पुरः अग्रे रोदिमि रोदनं करोमि त्वं
इति खेदे कथय वा इति त्वं कथय वद रुदिर् अश्रुविमोचने रुदादिभ्यः सार्वधातुके इतीट् देवानामवहेलना
नैरपेक्षः त्वमपि अस्मिन् समये यदि त्यजसि तर्हि मे का गतिरिति त्वमेव कथयेति भावः ४ पुनरपि प्रवाहरू-
पस्मरणं पापहरणं प्रार्थयते स्मृतिमिति हे गंगे तव प्रवाहरूपा मूर्तिः अकृतसुकृतानां अतीताद्यतन
जन्मसु कृतपातकानां पुरुषाणामपि स्मृतिं स्मरणं याता प्राप्ता सती चंद्रांशुसरणिः चंद्रस्यांशवः किरणाः

इदानीं मातस्त्वं भजसि यदि भागीरथि तदा निराधारो हा रोदिमि कथय केषामिह पुरः ४
स्मृतिं याता पुंसामकृतसुकृतानामपि च या हरत्यंतस्तंद्रां तिमिरमिव चंद्रांशुसरणिः
इयं सा ते मूर्त्तिः सकलसुरसंसेव्यसलिला ममांतःसंतापं त्रिविधमपि पापं च हरताम् ५

तेषां सरणिः पंक्तिः सरणिः पद्धतिरित्यमरः तिमिरं अंधकारं यथा तथांतस्तंद्रां अंतःकरणाज्ञाना-
लस्यं नाशयति यथा चंद्रोदयेन तमो नश्यति तथा तव स्मरणेन महापातकिनां तत्सदृशानां पातकं न-
श्यति किंभूता मूर्त्तिः सकला देवाः तैः संसेवनीयजला एतादृशी ते मूर्त्तिः ममांतः संतापं अंतःकरण-
स्थं त्रिविधं कायिकवाचिकमानसिकरूपं पापं च तत्कृतं संतापमाधिभूताध्यात्माधिदैवं वा हरता-
म् तथा जाते जन्ममरणकष्टान्मुक्तः स्यामिति भावः ५

इदानीं राज्यत्यागपूर्वकं त्वत्तीरवासिनां लोभः पापेन जायमानस्य आनंदः ततोन्यूनसुखं मोक्षमुप
हसतीत्याह अपीति भो जननि प्राज्यमपि प्रभूतमपि प्रभूतं प्रचुरं प्राज्यमित्यमरः समुद्धांतमपी
त्यर्थः एतादृशं राज्यं राज्ञः कर्म्म पुरोहितादित्वाद्यक् प्रजापालनात्मकं सहसा तृणमिव परित्यज्य
अनेन लोभाभावः सूचितः विलोलद्वानीरं विलोलंतः वायुना चंचलाः वानीराः वेतसवृक्षाः यस्मि
न्तत् वेतसपर्य्याये रथाभ्रपुष्पविदुलशीतवानीरवंजुलाइत्यमरः अनेन छायापानि विडत्वं सूचि

अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा विलोलद्वानीरं तव जननि तीरं श्रितवताम्
सुधातः स्वादीयः सलिलभरमातृप्ति पिबतां जनानामानंदः परिहसति निर्वाणपदवीम् ६

तम् एतादृशं तव तीरं कूलं रोधश्च तीरं चेत्यमरः श्रितवतां सेवितां सुधातः अमृतात् पंचम्यंतात्तसिल्
स्वादीयः सलिलभरम् अतिशायने स्वादुः स्वादीयान् अतिशायने ईयसुन् सचासौ सलिलभरश्च तं
आतृप्तिपर्य्यंतं पंचम्याङ् परिभिरिति समासः पिबतां पानं कुर्वतां पाधातोः शतरि पाघ्रेति पि
बादेशः एतादृशानां जनानामानंदः निर्वाणपदवी निर्वाणस्य कैवल्यस्य पदवीं मार्गम् मुक्तिः
कैवल्यनिर्वाणेत्यमरः परिहसति उपहसति ६ इदानीं साक्षात्त्वत्संस्नानमकुर्वतामपि त्वेपि अन्य

संबंधित्वेन स्नावप्रवपतने तेषामप्युत्तमलोकप्राप्तौ साक्षात्स्नातीनां किं वक्तव्यमित्याह प्रभात इति
मो मातः प्रभाते उषसि प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि प्रभातं चेत्यमरः स्नातीनामर्थी
त्त्व जले स्नानं कुर्वतीनां नृपतिरमणीनां राजसुंदरीणां ब्राह्मणादिस्त्रीणां दारिद्र्यबाहुल्यान्मृगमदेन
मिलतीति उक्तं नृपतिरमणीनामिति तासां तु संपत्तिबाहुल्यात्सुलभ इति भावः कुचतटीगतः कु
चानां तट्यः प्रांताः तासु गतः विद्यमानः तटशब्दाज्जातिलक्षणो ङीप् तटं त्रिषु इति कोशात् स्त्रियाम
पि तटशब्दः रात्रौ रतिसमये लापितः अत एव स्थित इत्यर्थः एतादृशः मृगमदः कस्तूरी मृगनाभिर्मृग
मदः कस्तूरी चेत्यमरः तव तोयैः अंभोभिः सह युक्त इति तृतीया अंभोऽर्णस्तोयपानीयमित्यमरः यावद्य

० प्रभाते स्नातीनां नृपतिरमणीनां कुचतटीगतो यावन्मातस्मिलति तव तोयैर्मृगमदः
० मृगास्तावद्वैमानिकशतसहस्रैः परिवृता विशंति स्वच्छंदं विमलवपुषो नंदनवनम् ७

स्मिन्नेव काले मिलति संबद्धो भवति तावत्तस्मिन्नेव काले मृगाः मृगयंति उदरपोषणाय तृणादिकमन्वेष
यंतीति मृगाः हरिणाः मृगे कुरंगवातायुहरिणाजिनयोनय इत्यमरः विमलवपुषः विमलं मलरहितं
वपुर्येषां ते एतादृशाः संतो नंदनवनं नंदयतीति नंदनम् नंद्यादित्वात् ल्युः तच्च तद्वनं च इंद्रोद्यानं नंदनव
नम् अस्योद्यानमित्यमरः स्वच्छंदं यथास्यात्तथा विशंति गच्छंतीत्यर्थः क्वचित्तु विमलमनस इति पाठः
कथंभूताः मृगाः वैमानिकशतसहस्रैः विमानैरंबरं तिगच्छंतीति वैमानिकाः देवाः चरतीति ठक् तेषां श
तानि शतानां सहस्राणि तैः परिवृताः वेष्टिताः ७ इदानीं स्मरणोच्चारणाभ्यां क्रमेण मनः शांति पापसंस्रो

तनाशनतत्त्वं गंगेतिपदं मरणसमये म
कुर्वित्युक्तु इत्यादि

स्मृतमिति भो भागीरथि तत गंगेति पदं सुवृत्तं मम जगन्नाथस्य प्राणप्रान्तः प्राणानामसूनाम् पुंसि भूम्न्य
सवः प्राणा इत्यमरः अन्तः समाप्तौ अन्तः शब्दोऽधिकरणप्रधानमव्ययं प्राणोत्क्रमणसमये इत्यर्थः वदन
कमलान्तः वदनमेव कमलमिति मयूरव्यंसकादित्वात्समासः वदनं कमलमिवेत्युपमितसमासो वा तस्यान्त
र्मध्ये विलसतु शोभतु खलु निश्चयेन प्राणोत्क्रमणसमये गंगा गंगेत्युच्चारणं भवतु कफवातपित्तैः कण्ठ
रोधनं मास्त्विति भावः तत् किं यत् गंगेति पदं सकृदप्येकवारमपि स्मृतं सत् चिन्तितं सत् स्वान्तं मनः शान्तं
इन्द्रियनिग्रहक्षमं देवलोभादिरहितं वा विरचयति करोति शान्तं सुखमुक्तं वा शान्तशब्दादर्शआद्यच् शर्म्म शा
तसुखानि चेत्यमरः रचप्रतियत्ने चुरादिः पुनस्तत् किम् यत्सकृदपि प्रगीतं सत् प्रकर्षेण गीतं सत् उच्चारि

स्मृतं सद्यः स्वान्तं विरचयति शान्तं सकृदपि प्रगीतं यत्पापं झटिति भवतापं च हरति
इदं तद्गंगेति श्रवणरमणीयं खलु पदं मम प्राणप्रान्ते वदनकमलान्तर्विलसतु ८

तं सत् पापं च पुनः भवतापं भवस्य संसारस्य तापः तं हरति नाशयति पुनः श्रवणरमणीयं श्रवणयोः रम
णीयं सुखजनकं कर्णशब्दग्रहौ श्रोत्रं श्रुतिस्त्री श्रवणं श्रवः इत्यमरः यद्वा श्रवणाय श्रवणकर्त्रे रमणीयं
सुंदरम् चतुर्थीति योगविभागात्समासः गंगाशब्दार्थस्तु गां पृथ्वीं स्वर्ल्लोकादागता गंगा गनाम्यघोरित्यौ
णादिको गन्प्रत्ययः तदुक्तं ब्रह्माण्डपुराणे तिस्रो नद्यो महापुण्या वेणा गोदा च जाह्नवी गां हरी शां त्रिकान्त
प्राप्ता गंगेतीह प्रकीर्त्तितेति हरेः पादाच्च सोमस्तत्काच्च गां प्राप्तेति तदर्थः यद्वा गम्यते सोपानभूतया यया
स्वर्गः सा गंगा तदुक्तमाचार्य्यैः स्वर्गसोपानसंगेति या केनापि निरुक्तो गमनाद्गंगेति सामान्यत एवोक्तमिति

इदानीं करटानामपि इंद्रोपानापेक्षयाप्यतितरां तव तीरं मम शमनाशने समर्थमस्त्विति प्रार्थ्यते यदिति
सो भागीरथि तव तव एतत्समीपवर्त्तितीरं नः अस्माकं शमनशमनधीरं शमनस्य यमस्य शमने तत्र धीरं समर्थं
पंडितं वा धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पंडितः कविरित्यमरः भवतु अस्तु ततः किम् यदंतः यस्य
तीरस्यांतः मध्ये खेलंतः क्रीडंतः काकाः करटाः काके तु करटारिष्टेत्यमरः बहुलतरसंतोषभरिताः
संतः अतिशयेन बहुलः बहुलतरः अतिशायने तरप् बहुलतरश्चासौ संतोषश्च तेन भरिताः पूर्णाः
एतादृशाः संतः नाकाधीश्वरनगरसाकांक्षमनसः नाकः स्वः स्वर्गोस्य स्वरव्ययं स्वर्गनाकत्रिदिव त्रिद

यदंतः खेलंतो बहुलतरसंतोषभरिता न काका नाकाधीश्वरनगरसाकांक्षमनसः
निवासाल्लोकानां जनिमरणशोकापहरणं तदेतत्तीरं शमनशमनधीरं भवतु नः ॥८॥

शालया इत्यमरः अधीश्वरः पतिः इंद्रः तस्य नगरं अमरावती तत्र साकांक्षं साभिलाषं मनो येषां ते ए
तादृशा न भवंतीति शेषः अमरावत्या अपि तीरे अधिकगुणसत्त्वादित्यर्थः तदेवाह कथंभूतं तीरम्
निवासाद्धेतोः विभाषा गुणे स्त्रियामिति हेतौ पंचमी लोकानां जननमरणशोकापहरणं जनिरुत्प
त्तिः जनिरुत्पत्तिरुद्भव इत्यमरः मरणं निधनं मृ मरणं निधनोऽस्त्रियामित्यमरः शोकः पुत्रक
लत्रादिवियोगजनितमनोविकृतिरूपः त्रयाणां द्वंद्वः एषामपहरणं नाशकम् अमरावत्यां तु क्षीणे
पुण्ये मृत्युलोकं विशंतीति पुनरपि मृत्युलोकप्राप्तिरूपानिष्टमप्यस्तीति भावः कदाचिद्विमानस्थेनें
द्रेण तीरे खेलतः काकान् दृष्ट्वा पुष्पाभिः क्रीडार्थं मद्वेन आगंतव्यमित्युक्ते अत्रैव वयं निवसामः न तव देवे

ननु सर्वोत्कृष्टं वेदाद्यगोचरं परं ब्रह्म विहाय स्वाभिमतफलावाप्तये मामेव किं स्तौषीति चेत्तत्राह यद्ब्रह्म
तत्त्वमेव नेतरविषय इत्याह नयदिति भो सुरतटिनि सुराणां देवानां तटिनी धुनी तत्संबोधनं तटिनी ह्रा
दिनी धुनीत्यमरः तद्ब्रह्ममाता विशिष्टत्वे निखिलजगत्कारणत्वेन प्रसिद्धं ब्रह्मत्वं सर्ववाक्यसावधा
रणमिति न्यायात्त्वमेवेत्यर्थः असीतिशेषः न विषयः त्वमितरविषयभूता नासीत्यर्थः तत्किम् यत्
ब्रह्म गलितभेदैः गलितः गतः भेदो येभ्यस्ते गलितभेदाः तैरद्वैतप्रतिपादकैः नेह नानास्ति किंचनेत्यादिब्र
ह्मलक्षणैः साक्षाद्वेदैरपि प्रत्यक्षश्रुतिभिरपि न अवसितं इयत्तया न निश्चितमित्यर्थः षोऽन्तकर्म्मणीति

न यत्साक्षाद्वेदैरपि गलितभेदैरवसितं न यस्मिन् जीवानां प्रसरति मनोवागवसरः

धातोर्द्यतिस्यतीतीत्वम् उपसर्गवशादुक्तार्थलाभः तदुक्तम् उपसर्गेण धात्वर्थो बलादन्यत्र नीयत इति
ननु नेह नानास्ति इत्यादिश्रुतिभिः इतराभावबोधनेपि स्वाभावाबोधनेन कथमद्वैतसिद्धिरिति चेन्न स्व
स्मिन्नपि स्वप्रवृत्त्या स्वाभावस्यापि बोधनात् अत एव ससजुषो रुः खरवसानयोर्विसर्जनीय इत्यादिनिर्दे
शः संगच्छते इति दिक् वेदानामप्यगोचरमित्युक्तत्वादिति भावः पू० यस्मिन्ब्रह्मणि जीवानां व्यासादिप्रा
णिनां मनोवागवसरः मनश्च वाक् च अनयोः समाहारः मनोवाक् द्वंद्वश्च प्राणीत्येकवद्भावः मनोवाचः अ
वसरः व्यापारः इति यावत् न प्रसरति न प्रसरणशीलो भवतीत्यर्थः यतो वाचो निवर्त्तंते अप्राप्य मनसा सहे
ति श्रुतेरिति भावः ननु मनोवागित्यत्र द्वंद्वश्च प्राणीति नियमान्नित्यसमाहारे द्वंद्वाच्चुदषहान्तादिति टचाभावः कथम्

तथा चोक्तप्रयोगासंगतिरिति चेन्न समासांतविधेरनित्यत्वात् अत्र प्रमाणं तु अश्ववादिगणे राजन्शब्दपाठः इति
दिक् मनःशब्दस्य प्राणपर्यायत्वाभावेन श्लोके वनेति वा पु० त० निराकारं निर्गतः आकारो यस्य तत् अशरीरमि
त्यर्थः अपाणिपादमित्यादिश्रुतेः पु० नित्यं निरंतरमेव नित्यम् अव्ययात्यप् उत्पत्त्यादिशून्यमित्यर्थः
न जायते म्रियते इत्यादिश्रुतेरित्यर्थः पु० निजमहिमनिर्वासिततमः निजमहिम्ना स्वमाहात्म्येन निर्वासि
तं नाशितं तमो येन तत् स्वप्रकाशमित्यर्थः यस्य भासा सर्वमिदं विभाति यदादित्यगतं तेजो जगद्भासयतेऽखि
लम् यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमित्यादिश्रुतिस्मृतिभ्यामित्यर्थः पु० विशुद्धं मायामलरहितम्
नारायणतीर्थसरस्वतीभिरपि गंगैवाद्वितीयं ब्रह्मेत्युक्तम् न नानेहास्तीति श्रुतिवचनजाते भगवती निरस्यैवाभा

निराकारं नित्यं निजमहिमनिर्वासिततमो विशुद्धं यत्तत्त्वं सुरतटिनि तत्त्वं न विषयः १०

सि स्वयमखिलभेदं सुरधुनि चिदात्मैकानित्या चितिसुखसदाविष्कृतिरसि त्वदीयं मोक्षार्थं श्रयति ज
नता जीवनपदमिति अत्र शिष्यबुद्धिवैशद्याय किंचिदुच्यते वेदानामब्रह्मप्रतिपादकमपौरुषेयं प्रमाणवाक्य
म् सच मंत्रब्राह्मणात्मकः तत्र मंत्रा नाम अनुष्ठानकारकभूतद्रव्यदेवताप्रकाशकाः ते च ऋग्यजुःसामभे
दात्त्रिधा पादबंधगायत्र्यादिछंदोविशिष्टा ऋचः अग्निमीलइत्यादयः गीतिविशिष्टाः ता एव सामानि
उभयविलक्षणानि यजूंषि ब्राह्मणमपि त्रिविधम् विधिरूपम् अनुवादरूपम् उभयविलक्षणं चेति मी
मांसाग्रंथेभ्योऽवधेयम् इह विस्तरभयान्न तन्यते इति दिक् १० इदानीं निखिललोकानां साधारणेनाऽ ८
त्यंतदुष्प्रापविष्णुपददा त्वं न केनापि तुलनीयेत्याह महे ति भो भागीरथि अखिलसाधारणतया अखि

लानां सर्वलोकानां साधारणेन तत्साधारणत्वं न तु न्यूनाधिक्यम् तथा विष्णोर्न्नारायणस्य विष्णुर्न्नारायणः
कृष्ण इत्यमरः पदं चरणं वैकुंठस्य स्थानं वा यद्वा विष्णोः पदं वस्तु विष्णुरूपवस्त्वित्यर्थः अस्मिन्पक्षे
राहोः शिर इतिवत् षष्ठी तथा च कोशः पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्विति ददानादत्रो न
लोकेति षष्ठीनिषेधात् पदमिति द्वितीया एतादृशत्वं इह लोके केन तुलनीया उपमेयासीति नः अस्मान्
कथय वद तादृशास्मकस्याप्यभावान्न केनाप्युपमेयासीति भावः यद्वा केन तुलया तुलनीयासि अ
पितु नेत्यर्थः तुलयापि तादृशसामर्थ्याभावादिति भावः तुल निष्कर्षे इति धातोरनीयर् विष्णुरूपं वस्त्वि

महादानैर्ध्यानैर्बहुविधवितानैरपि च यन्न लभ्यं घोराभिः सुविमलतपोराशिभिरपि अचिं
त्यं तद्विष्णोः पदमखिलसाधारणतया ददाना केनासि त्वमिह तुलनीया कथय नः ११

ति पक्षे सारूप्यमुक्तिः प्रतीयते तदुक्तं श्रीमच्छंकराचार्यैः त्वन्मध्याद्भृगुलांछनो गरुडगः पीतांबरो नि
र्गतः नारायणं वा शिवं वा इति वेति ततः किम् यद्विष्णुपदं महादानैः गजाश्वरथादिकातुलादिरूपैः ध्यानैः
चित्तैकाग्रतया चिंतनैः अपि च बहुविधवितानैरपि च बहुविधाः अनेकप्रकारा ये वितानाः क्रतवः क्रतु
विस्तारयोरस्त्री वितानं त्रिषु तुच्छके इत्यमरः बहुविधा ये वितानाः उल्लोचास्तैः अस्त्री वितानमुल्लोच इत्य
मरः घोराभिः भयंकराभिः परमकष्टसाध्याभिर्वा सुविमलतपोराशिभिरपि सुविमलानि निर्म्मलानि न तु
मारणोच्चाटनवशीकरणजनकानि तादृशानि यानि तपांसि तेषां राशयः समूहाः तैरपि न लभ्यं न प्राप्यं अ
र्हार्थे लभ धातोः पोरदुपधादिति यत् पुनस्तत् किम् अचिंत्यं चिंतानर्हं वागगोचरमिति भावः ११

इदानीं दर्शनमात्रेण नृणां संसारभयहंत्रीं त्वां शिवः पार्वत्यानुरोधत्यागपूर्वकं निरंतरं शिरसि बिभर्त्ती
त्याह नृणामिति सो भागीरथि ते तव मूर्त्तेः तनोः महिमानं परमदुर्घटकार्य्यकर्तृत्वरूपं माहात्म्यं इह
लोके कः निगदतु वदतु अपि तु न कोपीत्यर्थः माहात्म्यबाहुल्येन कस्यापि वाणीप्रसराभावादिति भावः
कथंभूतायाः मूर्त्तेः ईक्षामात्रादपि ईक्षैव ईक्षामात्रमिति मयूरव्यंसकादित्वात्समासः मात्रं कार्त्स्न्ये
ऽवधारणे इति कोशादवधारणे मात्रशब्दार्थः तस्मादपि नृणाम् नृ चेत्यस्य वैकल्पिकत्वाद्दीर्घाभावः

नृणामीक्षामात्रादपि परिहरंत्या भवभयं शिवायास्ते मूर्त्तेः क इह महिमानं निगदतु

भवभयं भवात्संसाराद्भयं हरंत्याः तदुक्तम् गंगे त्वद्दर्शनान्मुक्तिर्न जाने स्नानजं फलमिति पुनः क
थंभूतायाः शिवायाः शिवं पातीति शिवा तत्करोतीति णिजंतात्पचाद्यच् टाप् तस्याः यद्वा शिवं क
ल्याणं अस्तीत्यस्याः सा तस्याः यद्वा शिवो महादेवो भर्तृत्वेन अस्त्यस्या इति शिवो मोक्षोऽस्त्य
स्या इति पक्षचतुष्टयेऽपि अर्शआद्यच् शिवो मोक्षे महादेवे सुखे क्षेमे जले शिवमिति शाश्वतः
श्रीकंठः कपर्द्दी उग्रः कपर्द्दी श्रीकंठ इत्यमरः अमर्षम्लानायाः अमर्षेण कोपेन कोपक्रोधामर्ष
रोष इत्यमरः म्लाना ग्लाना तस्याः एतादृशाः गिरिभुवः गिरेर्हिमाचलात् भवतीति गिरिभूः पार्वती

क्षिप् तस्याः परमुत्कृष्टं अनुरोधं अनुसरणं विहाय त्यक्त्वा यां गंगां शिरसि निपतंतं निरंतरं यथा
स्यात्तथा धारयति बिभर्ति स्वार्थे णिच् सपत्नीभूतगंगायाः मस्तकधारणेन जातकोपायाः अ
पि पार्वत्याः सांत्वनादिकं विहाय अधिकगुणवतीं त्वामेव शिरसि बिभर्तीति भावः लोकेऽ
तिगुणवतो हि एकस्य मस्तकधारणं प्रसिद्धमेव १२ इदानीमुन्मत्तादिभिरपि विनिंद्यानि परि
हार्याणि अवाच्यानि यानि पापानि तन्नाशित्वमेव त्वाह विनिंद्यानीति यो गंगे उन्मत्तै

अमर्षम्लानायाः परममनुरोधं गिरिभुवो विहाय श्रीकंठः शिरसि नियतं धारयति याम्॥
विनिंद्यान्युन्मत्तैरपि च परिहार्याणि पतितैरवाच्यानि व्रात्यैः सपुलकमपास्यानि पिशुनैः

रविचारकारिभिः विशेषेण निंद्यानि निंदितुं योग्यानि अपि च पतितैः प्रायश्चित्तादिभिः परिहार्या
णि त्याज्यानि व्रात्यैः गर्भाधानादिसंस्कारहीनैः व्रात्यः संस्कारहीनः स्यादित्यमरः [illegible]
[illegible] अवाच्यानि वक्तुमयोग्यानि पिशुनैः कर्णेजपैः कर्णेजपः सूचकः स्यात् पिशुनो दुर्ज
नः खल इत्यमरः सपुलकं सरोमांचं यथा स्यात्तथा अपास्यानि त्याज्यानि एतादृशानि कियंती कियप
रिमाणमेषां ते कियंतः तेषाम् किमः संख्यापरिमाणे डतिच वतुप् किमिदंभ्यां वो घः बहूनामित्यर्थः

लोकानां एनांसि यंत्यघोऽभिन्नानि यंति गच्छंति प्रायश्चित्तादिना वा तानि एनांसि कलुषाणि इण
आगसीत्यसुण कलुषं वृजिनैनोघमित्यमरः हरंती नाशयंती एकासती कदापि कस्मिन्नपि काले ऽश्रांता
अखिन्ना एतादृशी त्वं जगति विश्वस्मिन् विजयसे सर्वोत्कर्षेण वर्तसे लोके कश्चन कदाचित् एवं कार्य्यं
यदि करोति तदा श्रांतो भवति बहुभिर्वा एकं महत् कार्य्यं कृतं चेत् सर्वे श्रांता भवंति त्वं तु असहाया अद्वितीया
सर्वेषां पापानि निरंतरं हरंत्यपि न श्रांतेति ममापि पापं दूरीकरिष्यस्येवेति भावः १३ इदानीं तव गुणानामेवा
यं दोषः यत् पृथिवीतले शोकनाशाय स्वर्लोकात् पतंत्या तव निर्लोभो पि शिवः कपर्दस्यापनमिषेण प्रति

हरंती लोकानामनवरतमेनांसि कियतां कदाप्यश्रांता त्वं जगति पुनरेका विजयसे १३ स्खले
ती स्वर्लोकादवनितलशोकापहृतये जटाजूटग्रंथौ यदसि विनिबद्धा पुरभिदा अये नि
र्लोभानामपि मनसि लोभं जनयतां गुणानामेवायं तव जननि दोषः परिणतः १४

ग्रहं चकारेत्याह स्खलंतीति भो भागीरथि अवनितलशोकापहृतये अवन्याः पृथिव्याः तलं स्वरूपं अ
धः स्वरूपयोः स्त्री तलमित्यमरः तत्र यः शोकः तस्यापहृतिर्नाशः तस्यै अपहृतिकर्तुमित्यर्थः स्वर्लोका
त् स्खलंती पतंती त्वं पुरभिदा शिवेन जटाजूटग्रंथौ जटाजूटस्य कपर्दस्य ग्रंथिस्तत्र यत् विनिबद्धा विशेषेण ९
निरंतरं बद्धासि उपसर्गद्वयं कदापि अन्यत्र गमनाभावं बोधयति अये जननि निर्लोभानामपि निर्गतः
लोभो येषां तेषामपि मनसि चित्ते लोभं इच्छां जनयतां कुर्वतां तव गुणानामेव दयादाक्षिण्यादीनामेवायं दोषः
परिणतः प्रसृतः निर्लोभतया कदाप्यप्रतिग्रहकर्ता शिवः तव गुणलोभवशेनैव अपूर्वप्रतिग्रहं चकारेति भावः १४

ते निपतंतः तान् एतादृशान् नरान् मनुष्यान् त्रातुं त्वं वरमं उत्कृष्टं भेषजं औषधमसि भेषजौषधभै
षज्यानीत्यमरः एवं च सर्वं भेषजं त्वं सर्वांतर्गतस्य मम अपि भेषजं भविष्यस्येवेति भावः १५ इदानीं क
पिलमुनिनिर्दग्धाः त्वत्संबंधवशात् स्वर्गे दिव्यदेहधारिणः सगरजाः सगरपुत्राः अद्यापि तव महिमान
महो धन्या जाह्नवी निधनं गता अपि वपुः त्वत्संगवशात् ईदृशा जाता इत्याकारकं गायंतीत्याह स्वभावेति
भो मातः स्वभावस्वच्छानां स्वभावेन निसर्गेण न तु कृत्रिमेण स्वरूपं च स्वभावश्च निसर्ग इत्यमरः स्वच्छा
नां निर्मलानां सहजमनायासेन मणिकाचसंक्षेपेण शिशिराणां शीतलानाम् उक्तं च कालिदासेन शै
त्यं हि यत् सा प्रकृतिर्जलस्येति एतादृशीनां ते अपां वारीणाम् आपः स्त्री भूम्नि वार्वारीत्यमरः अपारः अ

स्वभावस्वच्छानां सहजशिशिराणामयमपामपारस्ते मातर्जयति महिमा कोऽपि जगति
मुदा यं गायंति द्युतलमनवद्यद्युतिभृतः समासाद्याद्यापि स्फुटपुलकसांद्राः सगरजाः १६

मर्य्यादः अयं कोपि विलक्षणः महिमा माहात्म्यं जगति जयति सर्वोत्कर्षेण वर्तते सगरजाः सगरराजपुत्राः
अनवद्यद्युतिभृतः संतः न अवद्या गर्ह्या अनवद्या स्तुत्या अवद्यपण्यवर्येति सूत्रेण गर्ह्यायां अवद्येति निपातितम्
तादृशी चासौ द्युतिश्च तां बिभ्रतीति ते एतादृशाः संतः अत एव स्फुटपुलकसांद्राः संतः स्फुटाः प्रकटाः ये पुलकाः रो
मांचाः तैः सांद्राः निबिडाः संतः महिमानं अद्यापि मुदा प्रीत्या गायंति वदंतीत्यर्थः किं कृत्वा द्युतलं दिवस्तले
दिव् उ दिव्युत् द्योदिवौ द्वे स्त्रियामित्यमरः समासाद्य अधिष्ठित्य सगरेण हि अश्वमेधकरणाय अश्वो वि
निर्मुक्तः तत्संरक्षणाय स्वपुत्राः नियुक्ताः स च अश्वः इन्द्रेण चौर्येण पाताले नीतः सगरपुत्रा अपि तदान
यनाय तत्र गताः ते सर्वे कपिलेन निर्दग्धाः पश्चात् भगीरथेन स्वर्गात् गंगामानीय जीविता इति स्पष्टं रामायणादौ

इदानीं सर्वेषां रक्षणक्षमं परमौषधं त्वमसीत्याह जडानिति भोः श्रीव इह कलौ जडान् अज्ञान् क्रिया-
सु मंदानित्यर्थः जडोऽज्ञ इत्यमरः अंधान् चक्षुरिंद्रियहीनान् पंगून् पादगतिहीनान् प्रकृतिबधिरान्
प्रकृत्या स्वभावेन बधिरान् श्रोत्रेंद्रियहीनान् शास्त्रश्रवणासमर्थानित्यर्थः उक्तिविकलान् उक्तिभि
र्वचनैर्विकलाः हीनाः तान् पूर्वसदृशेति समासः व्याहार उक्तिर्लपितं भाषितं वचनं वच इत्यमरः वच
धातोः क्तिनि वचिस्वपीति संप्रसारणम् ग्रहग्रस्तान् ग्रहैरादित्यादिनवग्रहैर्ग्रस्ताः कवलिताः कृतपी
डा इति यावत् तदुक्तं ज्योतिःशास्त्रे स्वर्क्षोच्चे द्युबलास्त्रिखारिशुभगाः सप्ताष्टगा व्यङ्गाः पुनश्च्यापुत्राणु

जडानंधान्पंगून्प्रकृतिबधिरानुक्तिविकलान् ग्रहग्रस्तानस्ताखिलदुरितनिस्तार
त२ सरणीन् निलिंपैर्निर्मुक्तानपि च निरयांतर्निपततो नरानेवत्रातुं त्वमिह परमं भेषजमसि १५

अथ धर्मिमृत्युभुक कविः स्वाक्ता त्रिकोणगुरुः सोम्यो व्ययसमेखिला भवगताः शुक्लेन वेष्टद्विगश्चत्रोयो
निजभाग्यु मंनवहते अष्टिषु प्रोषं न सदिति अस्ताखिलदुरितनिस्तारसरणीन् अखिलानि तानि दुरि
तानि च पापानि तेषां निस्तारणं नाशनं तस्य सरण्यः प्रायश्चित्ताद्याचरणमार्गाः अस्ता विद्यमाना
अखिलदुरितनिस्तारसरणिर्येषां ते तान् पापबाहुल्येन अविद्यमानप्रायश्चित्तादीनित्यर्थः नि
लिंपैर्देवैः अनुपसर्गाल्लिंपेति सूत्रस्थेन नौ लिंपः संज्ञायामिति वार्त्तिकेन शः मुक्तान् स्वहस्तेन
परित्राणाभावात् अपि च निरयांतः निरयस्य नरकस्य अंतः मध्ये स्यान्नारकस्तु नारको निर

इदानीं स्वल्पपापिनां दोषापनुत्तये त्रिजगति गोदावर्य्यादितीर्थनिवहं नितीर्थानि सन्ति अतीतप्रायश्चित्तानां तु
दोषहरणे त्वत्सदृशीत्वमेव समर्थेत्याह कृतेति भोजननि कृतहृद्वैनस्कान् कृतानि हृद्गतानि स्वल्पानि पलां-
डुभक्षणादीनि एनांसि पापानि येषां ते तान् दोषाद्विभावेति कृष्व अथ पापाचरणानन्तरं झटिति शीघ्रं संतप्तम-
नसः संतप्तं पश्चात्तापयुक्तं मनो येषां ते तान् एतादृशान् नरान् समुद्धर्त्तुं आचरितपापात् दूरीकर्त्तुं त्रिभुव-
नतले त्रयाणां भुवनानां समाहारस्त्रिभुवनम् तद्धितार्थेति समाहारे द्विगुः पात्राद्यन्तत्वात् स्त्रीत्वाभावः तस्य त-
लं तत्र तीर्थनिवहाः तीर्थानां गोदावर्य्यादितीर्थानां निवहाः समूहाः सन्ति वर्त्तन्ते भोजननि प्रायश्चित्तप्रसरणा-
पथातीतचरितान् प्रायश्चित्तस्य पापनाशनसमर्थधर्म्मविशेषस्य प्रसरणमाचरणं तस्य पंथा मार्गः वाटः

कृतहृद्वैनस्कान् यत् झटिति संतप्तमनसः समुद्धर्त्तुं सन्ति त्रिभुवनतले तीर्थनिवहाः अपि प्राय-
श्चित्तप्रसरणापथातीतचरितान् नरान् दूरीकर्त्तुं त्वमिव जननि त्वं विजयसे १७

पंथाश्च मार्गश्चेति त्रिकांडमंडनः ऋक्पूरब्धूरिति समासांतो अप्रत्ययः प्रायश्चित्तप्रसरणापथान् अतीतं
अत्यंतं गतं चरितं येषां ते तान् बहुकालं बुद्धिपूर्वकं महत्पापाचरणेन अविद्यमानप्रायश्चित्तानपी-
त्यर्थः उक्तं च भुजबलाचार्य्यैः सुकृतिन ईषत्पापे प्रायश्चित्तं रघूत्तम प्रोक्तम् अपपातिमानुदीक्ष्य प्राय-
स्तदपीह गौरि वृथा बभूवुरिति एतादृशानपि नरान् दूरीकर्त्तुं आचरितपापादुद्धर्त्तुं त्वमिव त्वत्सदृशीत्वमेव वि-
जयसे अत्रोपमानोपमेयत्वं गंगाया एव तत्फलेन तु अन्या त्वत्सदृशी नास्तीति अत एवात्रानन्वयालंकारः
तदुक्तम् उपमानोपमेयत्वं यदेकस्यैव वस्तुनः इंदुरिंदुरिव श्रीमानित्यादौ तदनन्वयः इति प्रायश्चित्तप्राय-

र्म्मीमाचष्टे प्रायश्चित्तमशुद्धस्यापं पापक्षयार्थं नैमित्तिकं कर्म्मविशेषेष्टम् इत्याहुः संप्रदायविदो नि
बंधकारादयः केऽगस्त्याङ्गिरसादयः स्मृतिः प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते तपो निश्चय
संयुक्तं प्रायश्चित्तं तदुच्यते अस्यार्थः अनुष्ठितेन चान्द्रायणादिकादिना अवश्यं पापं निवर्त्तत इति
विश्वासो निश्चयः तेन संयुक्तं व्रतानुष्ठानलक्षणं तपः प्रायश्चित्तमित्यलं विस्तरेण १७ इदानीम
नेकगुणविशिष्टत्वेन पापहरणक्षमं तव वपुर्म्मम पापं नाशयतु इति प्रार्थ्यते निधानमिति मो
जननि धर्म्माणां वेदेन प्रयोजनमुद्दिश्य विधीयमानार्थानाम तदुक्तं जैमिनिना चोदनालक्ष
णोऽर्थो धर्म्मस्तेषां निधानं स्थानम निधीयते स्थाप्यते यस्मिन्निति निधाधातोः करणाधिकरण

निधानं धर्म्माणां किमपि च विधानं नवमुदां प्रधानं तीर्थानाममलपरिधानं त्रिजगतः
समाधानं बुद्धेरथखलु तिरोधानमधियां श्रियामाधानं नः परिहरतु तापं तव वपुः १८

योश्चेति ल्युट् चपुनः नवमुदं नवाश्च ता मुदश्च तासां नूतनहर्षाणां किमपि विधानं जनकं गंगादर्श
नेन विलक्षणो हर्षो जायते इत्यनुभवसिद्धम कर्त्तृकर्म्मणोरिति कर्म्मणि षष्ठी उभयत्र चपुनः तीर्था
नां प्रधानम चपुनः त्रिजगतः त्रयाणां जगतां समाहारः त्रिजगत् तस्य तद्धितार्थेति समाहारे द्विगुः
अमलपरिधानं अमलं निर्म्मलं च तत् परिधानं चामलपरिधानं अधोंऽशुकम अंतरीयोपसंव्यानप
रिधानान्यधोंऽशुक इत्यमरः यथा लोके कस्यचिद्वसनहीनस्य न शोभा तथा एतद्विना त्रिजगति इत्याकूतम्

च पुनः बुद्धिर्मनीषा यस्याः बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिरित्यमरः समाधानं नानादु
ष्कल्पनानाशकमित्यर्थः अयानेंतरं अधिपं निर्विघ्नं तिरोधानं अपिधानम् तेषामदर्शनमि
तिभावः अपिधानतिरोधानपिधानाच्छादनानि चेत्यमरः अयश्रियं लक्ष्म्यामोधानं स्यापकं
मोक्षादिलक्ष्मीसंपादकमित्यर्थः एतादृशगुणविशिष्टं तव वपुः शरीरम् गात्रं वपुः संहननं शरीरमि
त्यमरः नः अस्माकं तापं परिहरतु १८ इदानीं कामसिक्ततया भक्तत्वविद्योगो जातः अयं ममैवापराध
इत्याह पुर इति भोमातः मातृत्वेन अवश्यमपराधः सोढव्य इत्याकूतम् अयं ममैव एवो निश्चयार्थः

पुरोधावंधावं द्रविणमदिराघूर्णितदृशां महीपानां नानातरुणतरखेदस्य नियतम् ममै
वायं मंतुः स्वहितशतहंतुर्जडधियो वियोगस्ते मातर्यदिह करुणातः क्षणमपि १९

मंतुः अपराधः अस्तीति शेषः कोसावित्याकांक्षायामाह इहलोके तव वियोगः स्नानाद्यसंबंधः यत अ
भूत् अतः कारणात् क्षणमपि क्षणमात्रमपि करुणादयालुतामपि कर्तव्येति शेषः कारुण्यं करु
णा घृणेत्यमरः अपराधभवने मूलमाह कथंभूतस्य मम द्रविणमदिराघूर्णितदृशां द्रविणमेव मदिरा
उन्मादकारित्वात् यद्वा द्रविणं च मदिरा च ताभ्यां घूर्णिते घूर्णनयुक्ते भ्रमिते इत्यर्थः तादृश्यौ दृशौ येषां ते
दृक् दृष्टी चेत्यमरः नाना अनेकेषाम् अव्ययत्वात् षष्ठ्या लुक् एतादृशानां महीपानां महीं पांतीति ते महीपाः

च पुनः बुद्धेर्मनीषायाः बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिरित्यमरः समाधानं नानाद्
विकल्पनानाशकमित्यर्थः अपानेतरं अधिपां निबुध्यीनां तिरोधानं अपिधानम् तेषामदर्शपमि
तिभावः अपिधानतिरोधानपिधानाच्छादनानि चेत्यमरः अपवर्गिपां लक्ष्म्याम् ओधानं स्थापकं
मोक्षादिलक्ष्मीसंपादकमित्यर्थः एतादृशगुणविशिष्टं तव वपुः शरीरम् गात्रं वपुः संहननं शरीरमि
त्यमरः नः अस्माकं तापं परिहरतु १८ इदानीं कार्व्यीसकृतेषा पक्तव वियोगो जातः अयं ममैवापराध
इत्याह पुर इति भो मातः मातृत्वेन अवश्यमपराधः सोढव्य इत्याकूतम् अयं ममैव एवो निश्चयार्थः

वी५

पुरो धावं धावं द्रविणमदिराघूर्णितदृशां महीपानां नानातरुणतरखेदस्य निपतम् ममै
वायं मंतुः स्वहितशतहंतुर्जडधियो वियोगस्ते मातर्यदिह करुणातः क्षणमपि १९

मंतुः अपराधः अस्तीति शेषः कोसावित्याकांक्षायामाह इहलोके तव वियोगः स्नानाद्यसंबंधः एतत्र
भूतः अतः कारणात् क्षणमपि क्षणमात्रमपि करुणादयालवमपि कर्त्तव्येति शेषः कारुण्यं करु
णा घृणेत्यमरः अपराधभवने मूलमाह कथंभूतस्य मम द्रविणमदिराघूर्णितदृशां द्रविणमेव मदिरा
उन्मादकारित्वात् यद्वा द्रविणं च मदिरा च ताभ्यां घूर्णिते घूर्णनयुक्ते भ्रमिते इत्यर्थः तादृशे दृशो येषां ते
दृक् दृष्टी चेत्यमरः नाना अनेकेषाम् अव्ययत्वात् षष्ठ्या लुक् एतादृशानां महीपानां महीं पांतीति ते महीपाः

रजानः तेषां अग्रे निपतं निपतमेव धावं धावं धावित्वा धावित्वा धावुगतिशुद्ध्योरिति धातोराभीक्ष्ण्ये णमु
मुलच्चेति णमुल् सिद्धं त्वं तरुणतरखेदस्य अतिशयेन तरुणः तरुणतरः तादृशः खेदः श्रमो यस्य तस्य
वत्स नानातरुणतरखेदस्येत्येकं पदम् नाना अनेकविधः तरुणतरः खेदो यस्य पुनः कथंभूतस्य
स्वहितशतहेतुः स्वस्य हितानि पथ्यानि तेषां शतं तस्य हेतुर्नाशकः तस्य अत एव पुनः कथंभूतस्य ज
ऽधियः जडाधीर्यस्य तस्य १८ पूर्वं दयाविधेयेत्युक्तं इदानीं किं विषयिणी दयेत्याकांक्षायां तव जलं
मम पुनः भवनमेव दूरीकरोत्विति प्रार्थयते मरुदिति भो मातः तेतव जलं मम जगन्नाथस्य जननजालं
जननस्य जन्मनः जनुर्जननजन्मानीत्यमरः तस्य जालं समूहः तत् जालं समूह आनाय इत्यमरः

मरुल्लीलालोलल्लहरिलुलिताम्भोजपटलीस्खलत्पांसुव्रातच्छुरणविसरत्कौङ्कुमरुचि

जरयतु नाशयतु जृष् वयोहानौ स्वार्थे णिज् ततः जनीजॄष् इति मित्वे मितां ह्रस्व इत्युपधाह्रस्वः कथं
भूतं जलं मरुल्लीलालोलल्लहरिलुलिताम्भोजपटलीस्खलत्पांसुव्रातच्छुरणविसरत्कौङ्कुमरुचि
मरुतः वायोः लीलाविलासः तेन लोलत्यश्चञ्चला याल्लहर्यः वीचयः ताभिः लुलितानि लोलानि
यानि अम्भोजानि कमलानि तेषां पटली समूहः तस्याः स्खलंतः पतंतो ये पांसवः रजांसि तेषां व्रातः
समूहः तस्य छुरणं अंगलेपः तेन विसरंती प्रसरणशीला तादृशी कौंकुमरुचिर्दीप्तिर्यस्य तत् कमलर
जःपतनेनात्यंतमारक्तमिति भावः पुनः कीदृशम् सुरस्त्रीवक्षोजक्षरदगरुजंबालजटिलं सुराणां
इन्द्रादिदेवानां स्त्रियः इन्द्राण्यादयः तासां वक्षोजाः स्तनाः तेभ्यः क्षरन् पतन् यः अगरुजंबालः कृष्णचंदनपंकः

वंशाकागरुरजेहैत्यमरः निषद्वरस्तु जंबालः पंकोस्त्रीत्यमरः तेन जटिलेसजटं जटाशब्दानुवादिला

दिलश्च पुनः कथंभूतम् जंबाले जंबालः पंकः अस्ति यस्मिन् तत् यद्वा जंबालः शैवालं अस्ति यस्मिन्

यद्वा जंबालाः मदनद्रुमाः धत्तूर वृक्षा इत्यर्थः ते संत्यस्मिन् तत् तथा च कोशः जंबालः शैवले पंके

जंगले मदनद्रुम इति वक्तव्ये पि जंबालशब्दान्मत्वर्थीयो ऽर्शआद्यच् महल्लीलालोललल्लहरीत्यत्र

संति ताः तां तोलंति तिलः कौकुमरुच्योः समासं कृत्वा पश्चाद्विसर्गलोपे नस मासे पुंवद्भावः तालव्या

अपि दंत्याश्च शंबभूकरपांसवः इति द्विरूपकोशात्तालव्योपि पांसुशब्दः २० इदानीमुत्पत्तिस्थान

निवासस्थानव्यापारसौष्ठवेन जगदपेक्षया तवोत्कर्षो वर्त्तत इत्याह समुत्पत्तिरिति भोजननि

मुरस्त्रीवक्षोजक्षरदगरुजंबालजटिलं जलं ते जंबालं मम जननजालं जरयतु २०

समुत्पत्तिः पद्मारमणपदपद्मामलनखान्निवासः कंदर्पप्रतिभटजटाजूटभवने

जगतः विश्वस्मात्तवोत्कर्षः आधिक्यम् कस्माद्धेतोर्न जागर्त्तु नास्त्याम् अपितु सर्वस्माद्धेतोरुत्कर्षो वि

र्त्तत इत्यर्थः उत्कर्षप्रतिपादकहेतूनाह समुत्पत्तिरिति तव समुत्पत्तिः उद्भवः पद्मारमणपदपद्मामल

नखात् पद्मायाः लक्ष्म्याः लक्ष्मीः पद्मालयापद्मेत्यमरः रमणः पतिः विष्णुः तस्य पद [illegible] चरण

कमले तस्यामलनखः तस्माद्भवति जनिकर्त्तुरित्यपादानत्वम् तव निवासे स्थितिः कंदर्पप्रतिभट

जटाजूटभवने कंदर्पस्यानंगस्य कंदर्पो दर्पकोऽनंग इत्यमरः प्रतिभटः प्रतिपक्षी शिवः तस्य जटाजूटैः

कंदर्पः स्मर तस्य भवनं गृहं तत्र वर्त्तते इति भावः

सम्यगुत्पत्तिः ४

अथानंतरं तवापं व्यासंगः उद्योगः हतपतितनिस्तारणविधौ हताः शत्रुभिः शस्त्रादिना मारिताः प्र
पतिताश्चित्तिनः तेषां निस्तारणं उद्धारः तस्य विधिः करणं तत्र वर्त्तत इति शेषः विधिर्विधाने दैवे चेत्यमरः २१
इदानीं हरशिरसि निवसंत्याः विष्णुपदोद्भूतायास्तवोपमेया कापि नदी नास्तीत्याह नगेभ्य इति भोजन
नि कविभिः पंडितैः संख्यावान्पंडितः कविरित्यमरः तव तुलालेशः तुलायाः उपमायाः लेशः लवः
लवलेशकणाणव इत्यमरः यस्यां दीयेत तादृशी कावर्त्तते अपि तु न कापीत्यर्थः ननु कस्मादेवं ब्रूषे
वर्त्तत इति चेत्तत्राह नगेभ्य इति नगेभ्यः पर्वतेभ्यः नगो शाखिनि चान्यत्र स्यामिति याज्ञिक प्रतिभान्न

अथायं व्यासंगो हतपतितनिस्तारणविधौ न कस्मादुत्कर्षस्तव जननि जागर्त्ति जगति २१
नगेभ्यो यान्तीनां कथय तटिनीनां कतमया पुराणां संहर्तुः सुरधुनि कपर्दोऽधिरुरुहे
कया वा श्रीभर्तुः पदकमलमक्षालि सलिलैस्तुलालेशो यस्यां तव जननि दीयेत कविभिः २२

श्रो नलोपाभावः यान्तीनां आगच्छन्तीनां मध्ये यतश्च निर्धारणमिति षष्ठी कतमया तटिन्या पुराणां न
गराणां संहर्तुर्हरस्य शिवस्य कपर्दः जटाजूटः अधिरुरुहे अध्यारूढः नगेभ्यो यान्तीनां तटिनीनां
मध्ये कया वा तटिन्या श्रीभर्तुर्विष्णोः पदकमलं चरणपंकजं सलिलैः अक्षालि धौतमिति लकयप
अपि तु अस्मान् प्रति वद एवं च तत्र कापि कारणाभावात् कोप्युपमेया नेति भावः इदमेव मनसि निधा
य त्वामहं शरणं गत इत्याकूतम् अक्षालीत्यत्र चिणभावकर्मणोरिति कर्मणि चिण् श्रापे पूर्वार्द्धे

इदानीमेवं जननि मनोरथदायिनित्वेपि सत्यं ब्रह्मादीनां प्रयोजनमेव नास्तीत्याह विधत्तामिति भोज
ननि जनयति विश्वं उत्पादयति इति जननी विश्वमाता तत्संबोधनम् जगति विश्वस्मिन कामानां
मनोरथानाम् कर्म्मणि षष्ठी सवित्री उत्पादयित्री यदि जननी विश्वमाता त्वं जागर्त्ति अस्ति तर्हि वि
धिः विदधाति विश्वमिति विधिः ब्रह्मा विधात्रो वेधश्चेति वेधादेशोः स्विप्रत्ययश्च निरवधिसमाधिं
निर्गतः अवधिर्सीमादिरूपा मर्यादा यस्य तादृशोयः समाधिः चित्तवृत्तिनिरोधः तं निःशंकं निर्ग
ताशंका यस्मिन् कर्म्मणि यथा भवति तथा मयि निर्व्यापारे जगदुत्पत्तिः कथं भविष्यतीति शंकारहि

विधत्तां निःशंकं निरवधिसमाधिं विधिरहो सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः कृते
प्राणप्रेश्वैस्तैरलमथ तपोदानयजनैः सवित्री कामानां यदि जगति जागर्त्ति भवती २३

तमित्यर्थः विधत्तां करोतु हरिः हरति सर्वेषां दुःखमिति हरिः अच इरित्योणादिको इः शेषे सुखं यथा
स्यात्तथा शेताम् निद्रां करोतु सुखमित्यनेन निद्राभंगजनकः जगद्रक्षणरूपो व्याधिर्म्मास्त्विति सूचि
तम् हरः हरति विश्वमिति हरः पचाद्यच् शिवः अविरतं निरंतरं यथा स्यात्तथा नृत्यतु नृत्यं करोतु
अविरतमित्यनेन मध्ये कार्य्यांतर चिंतया नृत्यविरामो मास्त्विति सूचितम् प्राणप्रेश्वैः कृतं स्व
हस्तेन सृष्टिकारणभावात्तानि व्यर्थानीति भावः अथानंतरं तपोदानयजनैः तपांसि कृच्छ्रचांद्राय
णादीनि दानानि गजाश्वादीनि यजनानि देवपूजायागादीनि तैरलम् तैः साध्यं नास्तीति भावः

इदानीं अनाथ इत्यादिविशेषणमुक्तोऽहं स्नेहार्द्रामित्यादि विशेषणमुक्तां त्वां प्राप्तोस्मि अतस्त्वं स्वमह
त्वयोग्यं कुर्वित्याह अनाथ इति ॥ भोगंगे अयमहं शिशुः प्रतिदिनेदिने कृशो भवतीति शिशुः
शावकः शः किंत्सेन्दवेत्यादिसूत्रेण साधुः पृथुकः शावकः शिशुरित्यमरः मातरं जननीं त्वां प्राप्तो
स्मि इह विषये त्वं समुचितं सम्यगुचितं योग्यं विदध्याः कुरु शरणागतबालं मां मातृत्वान्मा त्यजे
तिभावः कीदृशोऽहं कीदृशीं त्वाम् अनाथः दीनः स्वाम्यंतराभाववानित्यर्थः स्नेहार्द्रा स्नेहेन प्री
त्या आर्द्रा क्लिन्ना ताम् आर्द्रसांद्रक्लिन्नमित्यमरः पुनः कीदृशोऽहं कीदृशीं त्वां विगलितगतिः विग
लिता नष्टा गतिः गमनं यस्य सः पक्षे विगलिता पापबाहुल्येन नष्टा गतिः पुण्यलोके गतिः गम

अनाथः स्नेहार्द्रां विगलितगतिः पुण्यगतिदां पतन् विश्वोद्धर्त्रीं गदविगलितः सिद्धभिषजम्
सुधासिंधुं तृष्णाकुलितहृदयो मातरमयं शिशुः संप्राप्तस्त्वामहमिह विदध्याः समुचितम् ॥२४॥

नं यस्य सः पुण्यगतिदां पुण्येषु गतिः तां ददातीति सा ताम् पक्षे पुण्येषु पुण्यलोकेषु गतिदाम् पुनः पतन्
पतितः विश्वोद्धर्त्रीं उद्धारकर्त्रीम् त्रिभुवनविधातुश्च कलह इतिवत् शेषषष्ठीसमासः एवं च विश्वा
तर्गतस्य ममोद्धारं करिष्यस्येवेति भावः पुनः गदविगलितः गदैः आतंकैः रोगैरित्यर्थः विगलितः वि
शेषेण गलितः जर्जरितः अथ आतंकगदाबाधाः शब्दाः पर्यायवाचका इति सिद्धभिषजं सिद्धो
बधवंतं सिद्धवैद्यरूपामित्यर्थः रोगहारि गदंकारो भिषग्वैद्यौ चिकित्सक इत्यमरः पुनः तृष्णाकु

लितहृदयः तृष्णया पिपासया आकुलितं व्याप्तं हृदयं यस्य सः सुधासिंधुं सुधायाः अमृतस्य सिं
धुं समुद्रम् यद्वा सुधायाः सिंधुं देशम् यद्वा सुधायाः सिंधुं नदीं तथा चामरः देशे नदविशेषेऽब्धौ सिं
धुर्ना सरिति स्त्रियामिति अत्र परिकरालंकारः साभिप्रायविशेषणोपन्यासत्वात् तदुक्तं कुवलयानंदे
अलंकारः परिकरः साभिप्राये विशेषणे इति २४ इदानीं यदारभ्य त्वत्कथया भूलोकमागता तदारभ्य
यमनगरकोलाहलः शांतः तद्दूता अपि दूरदेशं गताः विमानसंबंधि देववीथीं विदलयंतीत्याह विली
न इति भोजनेति यदवधि यदारभ्य ते तव कल्याणी कल्याणकारिका कथा महीमंडलमगात् इणो

विलीनो वैवस्वतनगरकोलाहलभरो गता दूता दूरं क्वचिदपि परेतान्मृगयितुम्

गा लुङि इति गादेशः गातिस्थेति सिचो लुक् तदारभ्य वैवस्वतनगरकोलाहलभरः वैवस्वतस्यांतक
स्य वैवस्वतोऽन्तक इत्यमरः विलीनः विशेषेणालीनः गुप्तः अभूदिति शेषः विशेषण्यकस्मि
न्नपि काले ईषदपि नास्तीति पूर्वं तत्र पापिगमने न तेषां ताडनात् कोलाहलः स्थितः इदानीं
तु त्वत्कथाश्रवणमाहात्म्येन पापाभावात् कस्यापि तत्र गमनाभावेन ताडनाद्यभावादिति भावः
दूता अपि अर्थात् यमसंदेशहारका अपि स्यात्संदेशहरो दूत इत्यमरः क्वचिद्देशे परेतान् प्राणि
न् मृगयितुं अन्वेषितुं दूरं गताः यस्मिन् देशे त्वत्कथाश्रवणं नास्ति तत्र गता इत्यर्थः ननु य

लितहृदयः तृष्णया पिपासया आकुलितं व्याप्तं हृदयं यस्य सः सुधासिंधुं सुधाया अमृतस्य सिं
धुं समुद्रम् यद्वा सुधायाः सिंधुं देशम् यद्वा सुधायाः सिंधुं नदीं तथा चामरः देशे नदविशेषेऽब्धौ सिं
धुर्ना सरिति स्त्रियामिति अत्र परिकरालंकारः साभिप्रायविशेषणेनासत्वात् तदुक्तं कुवलयानंदे
अलंकारः परिकरः साभिप्राये विशेषणे इति २४ इदानीं यदारभ्य तत्वकथा भूलोकमागतात दारभ्य
यमनगरकोलाहलः शांतः न दूता अपि दूरदेशं गताः विमानसंघश्च देववीथीं विदलयतीत्याह विली
न इति मोजननि यदवधि यदारभ्य तेतत्वकल्याणी कल्याणकारिका कथा महीमंडलमगात् इण

विलीनो वैवस्वतनगरकोलाहलभरो गता दूता दूरं क्वचिदपि परेतान् मृगयितुम्

गालुङ्गीति गादेशो गातिस्थेति सिचो लुक् तदारभ्य वैवस्वतनगरकोलाहलभरः वैवस्वतस्यांतक
स्य वैवस्वतोऽन्तक इत्यमरः विलीनः विशेषेणालीनः गुप्तत्वमभूदिति शेषः विशेषश्च कस्मि
न्नपि काले ईषदपि नास्तीति पूर्वं तत्र पापिगमनेन तेषां ताडनात् कोलाहलः स्थितः इदानीं
तु तत्कथाश्रवणमाहात्म्येन पापाभावात् कस्यापि तत्र गमनाभावेन ताडनाद्यभावादिति भावः
दूता अपि अर्थात् यमसंदेशहारका अपि स्यात् संदेशहरो दूत इत्यमरः क्वचिद्देशे परेतान् मृता
न् मृगयितुं अन्वेषितुं दूरं गताः यस्मिन् देशे तत्कथाश्रवणं नास्ति तत्र गता इत्यर्थः ननु य

मनगरगमनाभावेत्वतकथाश्रवणेन: क्वगच्छंतीतिचेत्तत्राह विमानानां विप्रिष्ठं आनयंतियेते विग
तं मानं वा येषां ते विमाना: व्योमयानानि व्योमयानं विमानोस्त्रीत्यमर: तेषां व्रातो निकर: स्तोमौ
२५ घनिकरव्रातेत्यमर: दिविषदां दिविसीदंतीति दिविषदो देवा: तेषाम् शेदॢ विशरणगत्यवसादने
ष्विति धातो: सत्सूद्विषेति क्विप् हृद्युभ्यां चेति ङेरलुक् सूपमादित्वात् षत्वम् वीथी: मार्गान् देवग
मनमार्गानित्यर्थ: विदलयति विशेषेण दलयति विदारयति त्वतकथाश्रवणमात्रेण सर्वेषां
विमानेर्गमनात् वारंवारं विमानसंबंधात् खनितानि करोती त्यर्थ: २५ इदानीं तव जलकणा:

विमानानां व्रातो विदलयति वीथीर्दिविषदां कथा ते कल्याणी यदवधि महीमंडलमगात् २५

स्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वरज्वालाजालज्वलितवपुषां न: प्रतिदिनम्

कामक्रोधजनितज्वरदग्धशरीरिणामस्माकं संतापनाशनं कुर्वंत्विति प्रार्थ्यते स्फुरदिति दिव्य
सरित: दिवि स्वर्गाकाशे भवा दिव्या भवार्थे दिगादित्वाद्यत् सा चासौ सरिच्च तस्या: गंगाया: मरुदुल्लास
लहरीछटाचंचत्पाथ: कणसरणय: मरुत: वायो: उल्लास: संबंध: गमनं वा लस संश्लेषणगमन
योरिति धातोर्भावे घञ् तेन या लहर्य: तासां या छटा: परंपरा: ताभिश्चंचत् उद्धत् यत्पाथ: उद
कम् कबंधमुदकं पाथ इत्यमर: तस्य कणा: तुषारा: तेषां सरणय: पंक्तय: न: अस्माकं कमपि श्रो
षधोदिभिरसाध्य तपारुपहर्त्तुमशक्यमपि संतापं हरंतो नाशयंतु कथंभूतानां न: प्रतिदिनं दिने दि २५

विभक्तीति सूत्रे योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानीति चत्वारो यथाशब्दार्थाः तत्र वीप्सायामव्य
व्ययीभावः स्फुरत्कामक्रोधप्रबलतरसंजातजटिलज्वरज्वालाजालज्वलितवपुषां कामोऽभि
लाषः कामः पंचशरः स्मृत इत्यमरः क्रोधः अमर्षः कोपक्रोधामर्षरोष इत्यमरः स्फुरंतौ देदी
प्यमानौ चेतौ कामक्रोधौ च ताभ्यां प्रबलतर अतिशयितं संजातः उत्पन्नः अत एव जटिलः शिखावा
न् एतादृशो यो ज्वरः तस्य ज्वालाः अर्चिषः तासां जालं समूहः तेन ज्वलितं दग्धं तादृशं वपुः शरीरं
येषां तेषाम् २६ पूर्वं जलकणाः संतापं हरंतीत्युक्तम् इदानीं तापप्रवाहुल्यात् कणानां कथं तत्सं

हरंतीं संतापं कमपि मरुदुल्लासलहरिच्छटाचंचत्पाथःकणसरणयो दिव्यसरितः २६
इदं हि ब्रह्मांडं सकलभुवनाभोगभवनं तरंगैर्यस्यांतर्लुठति परितस्तिंदुकमिव

भवतीति चेत् तव जलानां संघातः अस्माकं तापशमनं करोत्विति प्रार्थ्यते इदमिति भो जननि श्रीकं
ठप्रविततजटाजूटजटिलः प्रविततः विस्तृतः स चासौ जटाजूटश्च श्रीकंठस्य प्रविततजटाजूटः
तेन जटिलः सजटः एतादृशः स एषः तव जलानां संघातः समुदायः नः अस्माकं संतापं हरतु सकः
यस्य जलानां संघातस्यांतर्मध्ये सकलभुवनाभोगभवनं सकलभुवनानां चतुर्दशभुवनानां आ
सम्यक् तात भोगः सुखं भोगः सुखे स्त्र्यादिभृताविलमरः तद्वा सकलभुवनानां आभोगः परिपूर्णता

अप्पयदीक्षितैः

तस्य भवनं गृहम् एतादृशमिदं ब्रह्मांडं तरंगैः सह सहयुक्ते वृधाने इति सत्वेन तृतीया परितस्तिंदुकमिव तिंदुकस्य फलं तिंदुकम् तिंदुकः स्फूर्जकमित्यमरः तेंदु इति भाषायां प्रसिद्धिः लुठति लुठ संश्लेषणे तुदादिः हीति आश्चर्ये यस्मिन् चतुर्दशभुवनाधारभूतं ब्रह्मांडमपि स्थितम् सोपि शिवकपर्द इत्याश्चर्यम् अत्रोत्तरोत्तरमुत्कर्षस्य सत्वात् सारालंकारः तदुक्तं अप्पय्यदीक्षितैः कुवलयानंदे उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयत इति २७ इदानीं ननु रे तीर्थानि तरणि शिवादिदेवाश्च विहाय मामेव स्तौषीति चेत्तीर्थानि मदुद्धरणविधौ लज्जंते शिवादयश्च कर्णौ हस्तेनापिदधति त्वं तु मातृत्वेन दयया मां पुनाना तेषां पापनाशनाभिमानं नाशयसीत्याह श्वपत इति मो श्वतकपा

स्थित ४ किं२ प १

सदैवं श्रीकंठप्रविततजटाजूटजटिलो जलानां संघातस्तव जननि तापं हरतु नः २७

श्वपचे तीर्थानि त्वरितमिह यस्योद्धृतिविधौ करं कर्णे कुर्वंत्यपि किल कपालिप्रभृतयः
इमं तं मामंब त्वमियमनुकंपार्द्रहृदये पुनाना सर्वेषामघमथनदर्पं दलयसि २८

हे हृदये अंब अनुकंपादयातयार्द्रं हृदयं यस्याः सा तत्संबोधनं एतादृशि अंब जननि अंबत्वेन त्यागानर्हता तं इमं तव समीपे वर्त्तमानं मां जगन्नाथं पुनाना पुनाति तच्छीला ताच्छील्ये शानच पवित्रीकुर्वाणा इयं त्वं तेषां तीर्थादीनां अघमथनदर्पं अघस्य पापस्य मथनं नाशनं तस्य दर्पः

ममदर्शनसमय एवेति भावः त्रपन्ते लज्जितानि भवन्ति स्वहस्तेन महापातकिनो पतुद्भिः

गर्वः तेदलयसि विदारयसि नाशयसीत्यर्थः एतावत्कालपर्य्यन्तं तेषां परमगर्वः स्थितः वयं सर्वे षां पापनाशनं कुर्म्मः इदानीं तु मम परमपातकिनस्त्वद्धस्तेन उद्धरणाभावात्त्वया उद्धरणस्य कृतत्वात्तेषां गर्वो गत इति भावः ननु तेषां हस्तेन किमित्युद्धरणं न भवतीति चेत्तत्राह तं कं इहपदस्य उद्धृतिविधौ उद्धृतेः विधिः करणं तत्र विधिर्विधाने दैवे चेत्यमरः तीर्थानि गोदावर्य्यादीनि त्वरितं व्यापारपरा महापातकिनो मम मोद्धरणाभावाल्लज्जेति भावः पुनस्ते कं न स्योद्धरण विधौ कपालिप्रभृतयोऽपि कपाली प्रभृतिः आदिर्येषां ते विश्वादयोऽपि करेण हस्तं कुर्वंति स्थापयंतीत्यर्थः स्वहस्तेन एतस्योद्धृत्यभावात् एतस्य किमपि न ज्ञातव्यमित्याशयेन करेण हस्तं न्यासयंतीत्यर्थः

श्वपाकानां व्रातैरमितविचिकित्साविचलितैर्विमुक्तानामेकं किल सदनमेनःपरिषदाम्।

इति भावः करं करेणेत्येकवचनं तु द्वितीय[illegible]करेण न ज्ञातव्यं यद्धि स्वहस्तेन एतदीयं कार्य्यं भविष्यतीति चेत् करिष्यामः नो चेन्नेत्येतदर्थबोधनाय २८ इदानीमपरिमितसंख्याकेन पापाचरणेन निवृत्तैश्चांडालानां समूहैरपि त्यक्तानां पापानामाकरे पुनातु मत्ते कुर्वत्यास्तव स्तुतिं कर्तुं नरः पटुः हं कथं ज्ञा कुर्यामित्यहंकारपरिहरणव्याजेनाह श्वपाकानामिति ओजननि मां उद्धर्तुं परिकरं कटिबंधं विवेकमारंभयत्नं वा प्रगाढगात्रिकाबंधे विवेकारंभयोरिति विश्वः जल्लारंभोपारकराचितित्रिकांड

घटयंत्याः कुर्वत्याः तव श्लाघां स्तुतिं कर्तुं नरपशुरिवेति व्याघ्रादित्वात्समासः सर्वान विशेषेणाप
श्यतीति पशुः हिताहितज्ञानशून्यः मूर्ख इति यावत् एतादृशोऽहं कथमिव केनापि प्रकारेण सम
र्थः अपि तु न कथमपीत्यर्थः मन्मति मां घातं तव गुणानामपारत्वाच्चेति भावः अहो इत्याश्चर्ये
परम पातकिनं मां पुनातु जल्हादिकं करोषीत्याश्चर्यम् कथंभूतं माम् अमित विचिकित्सा विच
लितैः अमिता अपरिमिता वक्रीत्यर्थः सा चासौ विचिकित्सा च इतः परं पातकानि कर्तव्यानि वा न
वेत्याकारः संशयः विचिकित्सा तु संशय इत्यमरः जन्न विचिकित्सा जुगुप्साख्यो वीभत्सरसस्था
यीभावः कित संशय इति धातोर्गुप्तिज्किद्भ्यः सन् इति सनि सन्यङोरिति द्वित्वे गुरोश्च हलः इत्यप्रत्यये टाप्

अहो मामुद्धर्तुं जननि घटयंत्याः परिकरं तव श्लाघां कर्तुं कथमिव समर्थो नरपशुः २८

अमितविचिकित्सापाशवलितैः पातकाब्धिवृतैः एतादृशैः श्वपाकानां श्वानं पचंतीति ते श्वपाकाः
चांडालाः यद्यपि पचादिगुणे श्वपचेति अजंते निपातितं तथापि न्यंकादिगणे श्वपाकशब्दस्य पाठ
तत्पक्षे कर्मण्यणि कुत्वम् निषादश्वपचावंतेवासि चांडालपुक्कसाः इत्यमरः तेषां व्रातैः समूहैः नत्वे
केनद्वाभ्यां वा विमुक्तानां विशेषेण मुक्तानां विशेषणश्च मनः पूर्वकत्यक्तानां नतु लोकलज्जयेति एतादृशीना
मेनः परिषदां एनसां पापानां परिषदः सभाः समूह इत्यर्थः तासामेकं अद्वितीयं सदनं गृहं किल नि
श्चयेन प्रसिद्धौ वा आश्चर्ये वा एतादृशमपि पापिनं मां पुनातु उपुक्तासीत्याश्चर्यम् २९

इदानीं कस्यचिन्महापातकिनः समुद्धरणेन जगतः आश्चर्यसंपादनीयमिति तव महतीच्छास्थि
ता सा एतावत्कालपर्यन्तं तादृशस्य कस्यचित् पातकिनः अभावान्नपूर्णा अहं तु तादृशोच्छां
सफलीकर्तुं प्राप्तोस्मि अतः ममोद्धरणेन स्वेच्छासाफल्यं कुर्विति प्रार्थयते नेति भो अंब एतावं
तं समयमारभ्य एतावत्पर्यन्तं कोपि कश्चन पातकी न मिलितः प्राप्तः मयेति शेषः आरात् यदुद्धारात
यस्योद्धारस्तस्मात् जगतः विस्मयभरः भवतीति ते मनसि चिरकालं बहुकालं स्थितवती तिष्ठतीति
स्थितवती तामिमां पूर्वोक्तामीहामिच्छां सफलयितुं असफला सफला भवति तथा कर्तुं मत्सदृशादि
नकोप्येतावंतं खलु समयमारभ्य मिलितो यदुद्धारादाराद्भवति जगतो विस्मयभरः
इतीमामीहां ते मनसि चिरकालं स्थितवतीं मयि संप्राप्तोहं सफलयितुमेव प्रणयनः ३०
त्वात् कपथ्यानिनोश्चविति ध्रुवत्वं तु मुन् अयमहं जगन्नाथः संप्राप्तः अस्मीति शेषः नः अस्मान् प्रणय
पापं निरस्योत्तमां गतिं नयेत्यर्थः उपसर्गादसमासेपीति णत्वम् अंबेत्यनेन तव जननित्वं चेत् अ
हं तव पुत्रः एवं च मातुरिच्छा सततं पुत्रेणापि सफलीकर्तव्येति एतत्पुत्रधर्म एवायमिति सूचितं ३०
इदानीं ममानेकदुष्टगुणान् श्रुत्वा त्वां विना अन्यः कश्चन मम मुखं निरीक्षणमपि न कुर्यादित्याह

स्ववृत्तीति भोमातः स्ववृत्तिव्यासंगः स्वुनःवृत्तिः इतस्ततोभ्रमणं उञ्छिष्टभक्षणाचरणादितद्व्रतव्या
संगः उद्योगः मया कृत इति शेषः अथानंतरं नियतं निश्चयेन मिथ्याप्रलपनं असत्यानेकमपि
भाषणं कृतम् प्रलापोनर्थकंवचइत्यमरः परमपुण्यशीलेन युधिष्ठिरेण सकृन्मिथ्याकमिति त
ज्जन्यपापवशान्नरकांतरिक्षगस्तद्रथः भूमौलग्नः इतिस्पष्टं महाभारते मयानुसत्यत्यागपूर्वकं स[र्व]देव
ततं कृतमिति मत्पापसंख्यैवनेतिध्वा कृतम् कुतर्केषु कुत्सितानां परस्त्रीगमनपरगृहदारादिरूपक
र्मणां तर्काः ऊहाः तेषु यद्वा कुत्सिताश्च ते तर्काश्च तेषु यद्वा साक्षाद्ब्रह्मविद्याया अप्रतिपादकत्वेन
परजन्ये च्छयाच कुत्सिताः तर्काः तर्कशास्त्रग्रंथाः तेषु अभ्यासोपि कृतः सततपरपैशुन्यमननमपि

स्ववृत्तिव्यासंगो नियतमथ मिथ्याप्रलपनं कुतर्केष्वभ्यासः सततपरपैशुन्यमननम्
अपि श्रावं श्रावं मम तु पुनरेवं गुणगणान् ऋते त्वत्को नाम क्षणमपि निरीक्षेत वदनम् ॥२१॥

कृतम् पिशुनस्य सूचकस्य भावः पैशुन्यं द्वैजिह्व्यं परेषां पैशुन्यं तस्य मननं चिंतनं अभ्यासमिति
यावत् सततं निरंतरं च तत्पैशुन्यमननं च तदपि कृतम् एवं प्रकारेण मम तु गुणगणान् श्रावंश्रावं श्रु
त्वा श्रुत्वा त्वदृते त्वां विना अन्यारादितिसूत्रेण ऋतेयोगे त्वदिति पंचमी को नाम क्षणमपि वदनं अ[?]धा
त् मममुखं निरीक्षेत पश्येत् अपितु न कोपीत्यर्थः तव तु दयावाहुल्यादीदृशस्य मम मुखनिरीक्षणमा
वश्यकमेवेतिभावः तदुक्तं श्रीमच्छंकराचार्यैः कुपुत्रो जायेत क्वचिदपि कुमाता न भवतीति ॥२१॥

मात त्वेन २   पुन ४   न १

इदानीं तस्य मनुष्यस्य नेत्राभ्यां परमरमणीयं तव शरीरं न दृष्टम् तस्य कर्णाभ्यां च तव लहरीकोलाहलः न श्रुतः तस्य नेत्रे व्यर्थे करोति चिंतयन्नाह विशालाभ्यामिति अत्र यस्य तस्येत्यध्याहारः भो जननि यस्य मनुजस्य मानवस्य मनुजा मानवा नरा इत्यमरः याभ्यां नेत्राभ्यां परमरमणीया अतिसुंदरी अनेन दर्शने कारणं सूचितम् एतादृशी तव तनुः शरीरं न आलीढा न सादरमवलोकिता तस्य मनुजस्य विशालाभ्यां आकर्णविस्तृताभ्यां आभ्यां नयनाभ्यां कृत्वा इहास्मिँल्लोके किं फलम् न किमपीत्यर्थः यद्वा इह नालीढेति योजना यस्य ययोः श्रवणयोः कर्णयोः अ

विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं न याभ्यामालीढा परमरमणीया
तव तनुः अयं हि न्यक्कारो जननि मनुजस्य श्रवणयोर्ययोर्नान्तर्यातस्तव लहरि
लीलाकलकलः ३२

तन्मध्ये तव लहरि लीलाकलकलः लहरीणां लीलाक्रीडा तया कलकलः कोलाहलः कोलाहलः कलकल इत्यमरः इह न यातः न प्राप्तः तस्य तयोः श्रवणयोः अयं श्रवणरूपः न्यक्कारः धिक्कारः अस्तीति शेषः खलु निश्चयेन यद्वा ययोः श्रवणयोर्यं तन्मध्ये तव लहरि लीलाकलकलः न यातः ताभ्यां श्रवणाभ्यां कृत्वा किं फलम् न किमपीत्यर्थः परंतु अयं अदर्शनाश्रवणरूपो न्यक्कारो मनुजस्य न त्विंद्रियाणाम् इंद्रियव्यापारस्य मनुष्यव्यापाराधीनत्वादिति भावः तदुक्तम् ... ध्याहारः ताभ्यामित्यस्य चाध्याहारः

इदानीं यस्य मनुष्यस्य नेत्राभ्यां परमेश्वर्याः पदं तव शरीरं न दृष्टम् यस्य कर्णाभ्यां च तव लहरीकोलाहलः न श्रुतः तस्य नेत्रे व्यर्थे कर्णौ च व्यर्थावित्याह विशालाभ्यामिति अत्र यस्य तस्येत्यध्याहारः भोजननि यस्य मनुजस्य मानवस्य मनुजा मानवा नरा इत्यमरः ताभ्यां नेत्राभ्यां परमेश्वर्याः अतिसुंदरी अनेन दर्शनेकारणं सूचितम् एतादृशं तव तनुः शरीरं न आलोचनसादरमवलोकिता तस्य मनुजस्य विशालाभ्यां आकर्णविस्तृताभ्यां आभ्यां नयनाभ्यां कृत्वा इह लोके किं फलम् न किमपीत्यर्थः यद्वा इह नालोचितिः जननि यस्य पयोः श्रवणयोः कर्णयोः अं

विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं न याभ्यामालीढा परमरमणीया

तव तनुः अयं हि न्यक्कारो जननि मनुजस्य श्रवणयोर्यियोर्न्नियातो यात स्तव लहरि

लीलाकलकलः ३२

तस्मिन्ध्ये तव लहरिलीलाकलकलः लहरीणां लीलाक्रीडा तया कलकलः कोलाहलः कोलाहलः कलकल इत्यमरः इह न यातः न प्राप्तः तस्य तयोः श्रवणयोः अयं श्रवणरूपः न्यक्कारः धिक्कारः अस्त्विति शेषः खलु निश्चयेन यद्वा ययोः श्रवणयोरंतः मध्ये तव लहरिलीलाकलकलः न यातः ताभ्यां श्रवणाभ्यां कृत्वा किं फलम् न किमपीत्यर्थः परंतु अयं अदर्शनाश्रवणरूपो न्यक्कारो मनुजस्य न त्विंद्रियाणाम् इंद्रियव्यापारस्य मनुष्यव्यापाराधीनत्वादिति भावः तदुक्तम् कुं
ध्याहारः ताभ्यामित्यस्य चाध्याहारः

किं कर्तृकमिति एतत्पद्यं यस्य तस्येति ना
पश्यामि

पोस्व २

~~...~~पश्यामि लहरीमाद्यं च पश्यामि अतो मम नेत्रकरणं व्यर्थमित्याकूतम् एवं
चर्माखं मां पुनीहीति भावः अत्र विनोक्तिध्वनिरलंकारः त्वद्दर्शनं विना न यनेयोः लहरिको
लाहलश्रवणं विना श्रवणयोः अश्वरमणीयत्वस्य फलप्रश्नाधिक्काराभ्यां व्यंजनात् ३२ इदानीं
पुण्यवंतो विमानैः सुरपुरं स्वच्छंदं यांति पापिनस्तु पराधीनाः संतो नरकमध्ये पतंतीति को
टिद्वयं यत्र देशे त्वं नास्सि तत्र संभवति यत्र तु निखिलपापनाशिनी त्वमसि तत्र द्वितीयकोटेर
भावात् आद्यकोटिरेव संभवतीत्याह विमानैरिति भोजननि सुकृतिनः पुण्यवंतः विमानैः सु

विमानैः स्वच्छंदं सुरपुरमयंते सुकृतिनः पतंति द्राक्पापा जननि नरकांतः परवशाः

रपुरं सुराणां देवानां पूर्नगरीताम् यद्वा सुराणां पुरं नगरं स्वर्गं स्वच्छंदं यथा स्यात्तथा नतुत
त्परतादिवशेन अयंते गच्छंति पापाः पापस्वरूपाः जीवाः पापबाहुल्येन पापपुरुषरूपोत्रि
मुनिव्याकरणमितिवदभेदः यद्वा पापमस्ति येषां ते पापाः इति मत्वर्थे अर्शआद्यच् अ
त एव पापोऽहं पापकर्माहमित्यादिप्रयोगाः संगच्छंते इति दिक् पापमर्हंतीति वा पर
वशाः संतः यमनगरगमनाधीनाः संत इत्यर्थः नरकांतः नरकस्यांतर्मध्ये द्राक् शीघ्र

गमनागमनसमय एवेत्यर्थः यतेति सोमातः अवर्णविभागः विषमव्यवस्थात स्मिन्नसुषमसमय-
मूर्त्तौ असुषममयी अकल्याणप्रचुरा मूर्त्तिः तनुर्यस्य तस्मिन् स्त्रियाः पुंवद्भावः देशस्यासु-
षमयत्वं तत्रतत्र स्थितेरभावादेव एतादृशे जनपदे देशे नीवृज्जनपदो देश इत्यमरः अस्त्विति
शेषः तस्मिन् असुषमसमयमूर्त्तौ जनपदे अवर्णविभाग इति योजना तस्मिन् कस्मिन् यत्र जनपदे
दलितमनुजाशेषकलुषा मनुजानां मनुष्याणाम् अशेषकलुषं समस्तपापं दलितं नाशितं मनु-
जाशेषकलुषं यया सा एतादृशी त्वं नासि यत्र त्वं दलितमनुजाशेषकलुषा सती नासीति योज-
ना एवं चाद्य देतादृशी त्वं यत्रासि तत्र कस्यापि पातकिन अभावात् सर्वे पि विमानैः सुरपुरंग-

विभागो यत्र तस्मिन्नसुषमसमयमूर्त्तौ जनपदे न यत्र त्वं लीलादलितमनुजाशेषकलुषा ३२

च्छंतीति अघकोटिरेव स्थितेति भावः अत्र परिकरालंकारः दलितमनुजाशेषकलुषेति सा-
भिप्रायविशेषणस्य सत्वात् तल्लक्षणं तु पूर्वमुक्तम् ३२ इदानीं समस्तमहापातकिनो पि मरणस-
मये त्वयि शरीरं त्यक्तवंतः संत उत्तमलोकं गच्छंतीत्याह अपीति अत्र ये ते इत्यध्याहारः पूर्वश्लोका-
त् इत्यनुवर्त्तते तथा चैवं योजना भो अंब ते पापाः पापिनः पुरुषाः अंते मरणसमये त्वयि तनु-
शरीरं विहाय संत्यज्य अतनुघनाध्वरजुषां न तनु अल्प इत्यतनु महत् तच्च तद्घनं च तेन यो ध्व-
रः सर्वस्वदक्षिणायज्ञाः यज्ञः सवोध्वरो यागः इत्यमरः यज्ञा अतनूनि महांति घनानि येषु ते च

तेषु अध्वरेषु यद्वा अतनुदानानि चाध्वरेषु यद्वा न तनुः कोपः तेन यानि दानानि अध्वरेषु
तनुः कोपे त्वचि स्त्री स्यात् त्रिष्वल्पे विरले कृशे इति मेदिनी तान् जुषंति सेवंते कुर्वंतीत्यर्थः तेऽतन्
दानाध्वरजुषः तेषां उपरि उपरि लोके क्रीडंति विहरंति महादानयागप्राप्य लोकोपरि तन्लोकं ग
च्छंतीत्यर्थः तथा च गंगातनुत्यागाद् वो त्तमलोक प्राप्तेर्वरमोत्कृष्टसाध्यमहादानयागेषु न किं
चिदधिकं फलमिति भावः के ते येपापाः विप्रान् अपि ब्राह्मणान् अपि अ विरतं निरंतरं यथा स्यात्तथा इदं
सर्वक्रियान्वयि घ्नंतीति ते घ्नंतः हनधातोः गमहनेत्युपधालोपः नलोपेति षष्ठीनिषेधाद्विप्रानि
त्यादि द्वितीया पुनः ते के ये गुरुसतीः गृणाति बोधकं करोति गुरुः कृग्नोरुच्चेत्युणादिसूत्रेण गृधातो

अपि घ्नंतो विप्रान् विरतमुन्मत्ता गुरुसतीः पिबंतो मैरेयं पुनरपि हरंतश्च कनकम् विहाय
त्वय्यंते तनुमतनुदानाध्वरजुषामुपर्युपरि क्रीडंत्यखिलसुरसंभावितपदाः ३८

इत्यस्मात्कु प्रत्ययः उकारश्चांतादेशः तथा चोपनयनादर्वाचीनसंस्कारपूर्वकं वेदाध्यापको मंत्रो
पदेशकश्च गुरुः स्यात् निषेकादिकृद्गुरुरित्यमरः तस्य सत्यः पतिव्रताः स्त्रियः सती साध्वी पतिव्रते
त्यमरः ताः उन्मत्ताः वक्ष्यति इच्छंति ते उन्मत्ताः वशकांतौ अदादिः तत्र हि कांतिरिच्छेत्युक्तम् तस्मा
च्छतरि ग्रहिज्येति संप्रसारणम् यद्वा गुरोः पितुः सतीं मातृरित्यर्थः यद्वा गुरोः ज्येष्ठपितृव्यभ्रा
तृमातृमातुलादेः सतीः यद्वा गुरोः बृहस्पतेः सतीः तस्य एकस्त्रीत्वेपि जात्यभिप्रायेणाबहुवचन
मिति यथा कथंचिद्योज्यम् तथा चानेकार्थकोशः गुरुः पिता गुरुः ज्येष्ठो गुरुः सुरपुरोहितः दुर्वहो

पिशुनः प्रोक्तो गुरुः शिष्यामि सेवक इति पुनस्तके मैरेयं सीधुम् मैरेयमासवः सीधुरित्यमरः
पिबंतः पानं कुर्वंतः पुनस्तके ऽकनकं सुवर्णम् सुवर्णं कनकमित्यमरः हरंतः चोरयंतः कथंभूताः
ते अखिलसुरसंभावितपदाः अखिलसुरैः समस्तदेवैः संभावितं संभावनापुरस्कृतं कृतम् पूजितमिति
यावत् तादृशं पदं चरणं येषां ते बहुवचनेन तेन समासः यद्वा अखिलसुराणां संभावितं प्राप्तं तादृशं पदं
स्थानं यैस्ते सप्तमीविशेषणे इति ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिर्वा कर्तव्यः संपूर्वक भूधातोर्णिजंतात्
क्तः उपसर्गबलादुक्तार्थलाभः ३४ इदानीं महान् चोरः पुनरपि नराणां प्राणहारकोपि वायुः त्वल्लहरि
संबंधमाहात्म्येन त्रिभुवनं पवित्रीकरोतीत्याह अलभ्यमिति भोअंब सोपि परचौर्ये परप्राणहारित्वादि

अलभ्यं सौरभ्यं हरति सततं यः सुमनसां क्षणादेव प्राणानपि विरहशास्त्रक्षतभृताम्

गुणयुक्तोपि पवमानः प्रभंजनः पवमानः प्रभंजन इत्यमरः त्वदीयानां तवेमाः त्वदीयाः युष्मदस्मदोरन्यत
रस्यां खञ्चेति चाच्छः प्रत्ययो ञर परयोश्चेति त्वादेशः तासां लीलाचलितलहरीणां लीलया चलिताः च
चलाः गच्छंतो वा चलगताविस्यस्मात्प्रत्ययाः कर्मणि क्तः अनेन कर्तरि क्तः एतादृश्यो याः लहर्यः तासां व्य
तिकरात् संबंधात् त्रिभुवनं जगत्त्रयं पुनीते पवित्रीकरोति अहह इत्यद्भुते अहह इत्यद्भुते खेद इत्यमरः ननु
देवोपि वायुः कथं चौर्यादिगुणयुक्त इत्याशंकायामाह सकः यः पवमानः सुमनसां पुष्पाणाम् स्त्रि
यः सुमनसः पुष्पमित्यमरः अलभ्यमन्यत्र चौरैरप्राप्यम् अनेन चौर्ये वायोः कौशल्यमावेदितम्
एतादृशं सौरभ्यं सौगंध्यं निपतं यथा तथा हरति चोरयति पुनः सकः यः विरहशास्त्रक्षतभृतां विरह

विरहशस्त्रं च विरहशस्त्रे ताभ्यां जनतक्षतं तत विभ्रति ते विरहशस्त्रभृतः तेषाम् क्वचित्तु विरहशस्त्र
क्षतहृदामिति पाठः तत्र विरहशस्त्राभ्यां क्षतं क्षतमुक्तं कृतम् विदारितमिति यावत् तादृशं हृत् येषामि
ति समासः यद्वा विरहशस्त्रयोः क्षतं यस्मिन्निति व्यधिकरणपदो बहुव्रीहिः तादृशं हृत् येषाम् विर
हशस्त्रक्षतयुक्तं हृत् येषामिति शाकपार्थिवादित्वान्मध्यमपदलोपि समासो वा तेषां प्राणानपि
असूनपि पुंसि भूम्न्यसवः प्राणा इत्यमरः क्षणैकक्षणमात्रेणैव निपतनमयास्यान्तत्या हरति
एतादृशाः दुष्टा वायुः श्लेषः त्वल्लहरिसंबंधमाहात्म्येन महतकार्यकरोतीति भावः उक्तं चहत्तु

त्वदीयानां लीलाचलितलहरीणां व्यतिकरात् पुनीते सोपि द्रागहह पव मानस्त्रिभुवनम् ॥

मन्नाटके येमज्जंति निमज्जयंति च परांस्ते प्रस्तराः दुस्तरे वार्धौ वीर तरंति वानरभटान् संतारयंते ३५
पि च नैते ग्रावगुणा न वारिधिगुणा नो वानराणां गुणाः श्रीमद्दाशरथेः प्रतापमहिमा सोयं समुज्जृं
भित इति लोकेपि दुष्टो प्रभुभृत्यत्वसंबंधमाहात्म्येन महत्कार्यं करोतीति प्रसिद्धमेव ३५ इदानीं
केचन लोकाः परकार्यसंपादकाः संति केचन पवित्रात्मानः संतः परलोकगामिनो भवंति २१
अहं तु त्वयि स्थापितलोकद्वयभरः सन् सुखेन निद्रां करोमीत्याह किंभूत इति भोमातः किंभू
तः कतिसंख्याकाः एके साधारणा लोकाः इह जगति निपतंतो लोकाः पिवटकाः लोकानां जनानां

अर्थाः प्रयोजनानि अर्थारै विभवा अपीत्यमरः तेषां घटकाः संयोजकाः संति यद्वा
इह किं भूताः एके लोकार्थघटकाः संतः परलोकप्र
णयिनः परलोकं प्रणयंति प्रापयंतीति ते यद्वा परलोकं प्रकर्षेणानयंति गच्छंतीति ते परलोकप्रण
यिनः संतीति योजना इह लोके परकार्यसंपादनजन्यपुण्येन स्वर्गलोकं गच्छंति एवं चैते
ह्यामयं लोकः परलोकश्च समीचीन इत्याकूतम् परे चान्ये च कति यद्वा कति परे च पूतात्मानः संतः
पूतः सेवनादिना पवित्रः आत्मा येषां ते एतादृशाः संतः निपतं परलोकप्रणयिनः संति योमातः

किं भूताः संत्येके निपतमिहलोकार्थघटकाः परे पूतात्मानः कति च परलोकप्रणयिनः
सुखं शेते मातस्तव खलु कृपातः पुनरपि जगन्नाथः शश्वत्त्वयि निहितलोकद्वयभरः ३६

अथ जगन्नाथस्तु पुनः शाब्दस्त्वर्थः तव कृपातः पंचमं पतान्तसलिल द्रवाहेतोः शश्वन्निरंतरं सुखं
यथा स्यात्तथा शेते निद्रां करोति शश्वदित्यनेन कदापि अन्यन्न करोति सुखमित्यनेन तत्रैव म
मसुखेनान्यत्रेति सूचितम् ननु एवं चेल्लोकद्वये तव का गतिरिति चेत्तत्राह कथंभूतो यं त्वयि निहि
तलोकद्वयभरः त्वयि भवत्यां लोकद्वये इहलोके परलोके च भरः सर्वेभ्य उत्कृष्टता निहितः स्था
पितः लोकद्वयभरो येन सः भरः उदरपोषणं वा कुटुम्बधारणपोषणादिर्वा तस्मादचीतिदिक् ३६

इदानीं नतुरेकापनिवृत्तये मां स्तौषि तत्रादौ पापमेव किमर्थं करोषीति चेत् त्वया स्वपतिताश्लील
शावशाकलसमुदायपरित्राणं यथा क्रियते तथा ममापि पापं क्रियते स्वस्वभावस्य सर्वैरपि दु
ष्परिहारित्वादित्याह भवत्याहीति भो अंब व्रात्याधमपतितपा व्रात्याश्चाधमाश्च व्रात्याधमाः
व्रात्याः संस्कारहीनाः अधमा नीचाः ते पतिताः यस्यां सा तथा आहिताग्न्यादित्वात् पतितशब्द
स्य परनिपातः यद्यपि पतेः सनि तनि पतिर्तिकेन वेट्कत्वात् निष्ठायां यस्य विभाषेति इण्निषेधः
प्राप्नोति तथापि द्वितीया श्रितातीत पतितेति निपातनान्न भवति एतादृश्या भवत्या त्वया खंडपरिपाटीप
रित्राणस्नेहः खंडानामर्थात् स्वपतितशावशाकलानां भिन्नशाकलखंडे वा पुंस्यर्धार्धं समेंशक इत्य

भवत्या हि व्रात्याधमपतितपाखंडपरिपाटीपरित्राणस्नेहः श्लथयितुमशक्यः खलु यथा
ममाप्येवं प्रेमा दुरितनिवहेष्वंब जगति स्वभावोऽयं सर्वैरपि खलु यतो दुष्परिहरः २७

मरः परिपाटीतु समुदायः तस्याः परित्राणं पालनं तत्र स्नेहः प्रेम प्रेमा ना प्रियता हार्दं प्रेम स्नेह इत्यमरः
श्लथयितुं त्यक्तुं यथा अशक्यः खलु निश्चयेन एवं दुरितनिवहे दुरितस्य पापस्य निवहः समूहः तत्र म
मापि प्रेमा प्रियता अस्तीति शेषः यतो यस्मात्कारणात् जगति सर्वैरपि अयं स्वभावो निसर्गः स्वरू
पंच स्वभावश्च निसर्गश्चेत्यमरः दुष्परिहरः दुःखेनापि परिहर्तुमशक्यः अस्तीति शेषः दुःखशब्दे
उपपदे हरतेः ईषद्दुःसुषु खलिति सूत्रेण खल् यद्वा दुरितनिवहे जगतीति योजना व्रात्याधमपतितेत्यने

नतेषामपि रक्षणे किं वक्तव्यं दुःखपवतामित्यावेदितम् [illegible] खंडमित्यनेन अनवरतस्यपा
लने किं वक्तव्यमवदाविन इत्याशयः परिवादित्यनेनैकेमपि त्यजत इति भावः दुरितनि वहेत्यनेन
बहुषु पातकेषु ममेच्छा न त्वेकस्मिन् इत्यौर्वृत्यावेदितम् अत्र निंदयास्तुत्यभिव्यक्ते व्याजस्तुत्यलंका
रः तदुक्तं कुवलयानंदे उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिंदयोरिति ममयथा विवेकलेशोपि
न ते रामचंद्र रणेऽरिपून् हतान् स्वनाशकान् श्रीं ब्रुषापिनो न यसे दिवमिति अत्रापि न दिवं नयसे इ
त्युक्त्याभक्तानवश्यं नयसे इति स्तुत्यभिव्यक्तिः २७ इदानीं गंगातांडवविधिं वर्णयन् स्वतापशा
मनं प्रार्थयते प्रदोषेति त्रिदशतटिनी तांडवविधिः त्रिदशानां देवानां तटिनी गंगा तस्याः तांडवम्

प्रदोषांतर्नृत्यत्पुरमथनलीलोद्धृतजटातटाभोगप्रेंखल्लहरिभुजसंतानविधुतिः

तंडुना तच्छास्त्रप्रवर्तकाचार्येण प्रोक्तं तांडवं नाट्यम् तेन प्रोक्तमित्यणि ऋष्यण्ग्रहणमिति ग्रणः तांडवं
नटनं नाट्यमित्यमरः तस्य विधिः करणम् विधिर्विधाने दैवे चेत्यमरः तापं अधिज्ञत्त जनसंतापम्
एवं पूर्वश्लोकान्ममेत्यनुवर्तते तथा च मम तापं तिरोधत्तां अंतर्धानं गमयतु नाशयत्वित्यर्थः तांडव
सामग्रीमाह कथंभूतस्त्रिदशतटिनी तांडवविधिः प्रदोषांतर्नृत्यत्पुरमथनलीलोद्धृतजटातटाभो
गप्रेंखल्लहरिभुजसंतानविधुतिः प्रदोषस्य सूर्यास्तात् अनंतरं घटी द्वयात्मककालस्यांतर्मध्ये नृत्य

कुर्वन्स चासौ पुरमथनश्च शिवश्चेतेन लीलया उद्धृताः उत ऊर्द्ध्वं धृताः इत्थं नृत्यचेष्टा एतादृशाः
याः जटाः संयताः केशाः जटास्यात् संयतालका इति कोशः तदीयआभोगः पतनात्मकः संयोगस्स
वंधः नृत्यत्पुरमथनलीलोद्धृतजटानांतदाभोगः तेनप्रेंखंत्यः गच्छंत्यः चंचलावा याः लहर्य्यः
वीच्यः ताएवभुजाः संतानंच विधुतिश्च संतानविधुती संतानंदीर्घीकरणं विधुतिः कंपः भुजानां
संतानविधुतीयस्मिन् सप्रदोषांतः इदंसमस्तंव्यस्तंवा उक्तप्रदोषलक्षणेप्रमाणंतु त्रिमुहूर्त्तप्रदो
षःस्याद्भानावस्तंगतेसतीति हेमाद्र्याद्युदाहृतवचनंबोध्यमितिदिक् संतानेत्यत्र संपूर्वकधुञ्कं

विलक्रोडक्रीडज्जलडमरुडंकारसुभगस्तिरोधत्तांतापंत्रिदशतटिनीतांडवविधिः ३२

पनेइत्यस्मात् क्तिन् पुनःकथंभूतः त्रिदशतटिनीतांडवविधिः विलक्रोडक्रीडज्जलडमरुडंकारसु
भगः विलस्यविवरस्यक्रोडंत्वर्थात् मध्यः ननाक्रोडंभुजांतरमित्यमरः तत्रक्रीडत् विहरत् यज्ज
लंतदेवडमरुर्वाद्यविशेषः डक्केत्यर्थः वाद्यप्रभेदोडमरुमड्डुडिंडिमझर्झराइत्यमरः तस्येतनंवाद्यः २२
टंकारः शब्दविशेषः तेनसुभगः शोभनंसुष्ठुवाभगंश्रीःयस्य सः भगंश्रीकाममाहात्म्येत्यमरः सुंद
रइत्यर्थः क्वचित्तटक्रोडेतिपाठः ३२ इदानींसर्वदामयत्वांस्थापितकुशलचिंताभरंमांत्वंविष
मेऽस्मिन्समयेयदित्यजसि तर्हिस्यतःपरंभुवनत्रयेतवविश्वासंकोपिनकुर्यात् तवकरु

णा च निराधारा स्यादिति गंगायाः भयप्रदर्शनेनाह सदैवेति भो अंब सदैव सर्वदैव त्वय्येव भव
त्यामेव एकोदेवतेति धीतरं भावयन्नपीति अर्पितकुशलचिंताभरं कुशलस्य क्षेमस्य कुशलं क्षेम
मस्त्रियामित्यमरः तस्य चिंता कथं मम कुशलं भविष्यतीत्याकारिका तस्या भरः आधिक्यमव
क्यो चिंतेत्यर्थः भरः समूहो वा अर्पितः स्थापितः कुशलचिंताभरो येन सः तं गंगैव मम कुशलं क
रिष्यतीति मन्यमानमित्यर्थः इमं त्वत्समीपे वर्त्तमानमेतादृशं मां सुविषमे सुतरामत्यंतं विषमः दुः
सहः तस्मिन् अतिकठिन इत्यर्थः जन्मा विषं गरलं मयते ददातीति विषमस्तस्मिन् मेङ् प्रणिदा

सदैव त्वय्येवार्पितकुशलचिंताभरमिमं यदि त्वं मामंब त्यजसि समयेऽस्मिन् सुविषमे
तदा विश्वासोऽयं त्रिभुवनतलादस्तमयते निराधारा चेयं भवति खलु निर्व्याजकरुणा ३९

ने इत्यस्य आदेच उपदेशेऽशिति इत्यात्वे आतो नुपसर्गे कः इति आतो लोपः इटि च इत्याकारलोपः एता
दृशेऽस्मिन् समये यदि त्यजसि तदा तर्हि अयं विश्वासः गंगाशरणागतकुशलकर्त्रीत्याकारो निश्चयः
त्रिभुवनतलात् त्रिभुवनस्य तलं तस्मात् अस्तं तिरोभावं अयते गच्छति गमिष्यतीति वा वर्त्तमा
नसामीप्ये भविष्यति लट् च पुनः इयं निर्व्याजकरुणा अकपटकरुणा निराधारा भवति निर्गतः
आधारो यस्याः सा एतादृशी भवति खलु निश्चयेन संदेहो नास्तीति भावः विश्वासाभावेन कस्या

गं° ल°
टी°
२८

पितृवनिकटे आगमनाभावात् कारणान्तरविरोधत्वात् लोकेपि यस्य विश्वासो नास्ति तस्य नि
कटे कोपि नागच्छतीति प्रसिद्धमेव एवंच माहात्म्यसंरक्षणाय झटिति ममोद्धारणं कुर्विति गंगा
याभीतिप्रदर्शनमिति भावः क्वचित्तु समेपि इत्यस्य स्थाने विषमे इति पाठः तत्र विषमोद्धारणरूपे वि
षये इत्यर्थः ३९ इदानीं हरवामभोगकाद्धिता या कांता वर्त्तते इति प्रेक्षितुं कपर्दादुल्लस्य सीमंतसरणौ
आगता अत एव पार्वत्याः सापत्न्यभावात् करेणाकर्षिता एतादृश्यस्त्वल्लहर्यः विजयंतामित्या
ह कपर्दादिति भो जननि ते तव लहरयः कपर्दात् शिवजटाजूटात् उल्लस्य प्रसृत्य प्रणयमिलदर्धांग
युवतेः प्रणयेन प्रीत्या मिलंती संयुज्यमाना अर्द्धांगे वामभागे युवतिः भः पार्वती यस्य सः तस्य पुरारेः

कपर्दादुल्लस्य प्रणयमिलदर्धांगयुवतेः पुरारेः प्रेंखंत्यो मृदुलतरसीमंतसरणौ भवान्याः
सापत्न्यस्फुरितनयनं कोमलरुचा करेणाक्षिप्तास्ते जननि विजयंतां लहरयः ४०

शिवस्य मृदुलतरसीमंतसरणौ अतिशयेन मृदुलः कोमलः मृदुलतरः तादृशो यः सीमंतः केशवेशः
सीमंतः केशवेशे इति शकंध्वादिगणसूत्रेण पररूपम् तस्य सरणिः तत्र प्रेंखंत्यः गच्छंत्यः उपरिष्टा
दधोभागे आगता इत्यर्थः पुनः कथंभूताः अत एव भवान्या पार्वत्या कर्त्र्या भूतया कोमलरुचा कोमलरुक्
कांतिर्यस्य तेन एतेन पार्वती सौंदर्यमुक्तम् अत एव शिवेन प्रीतिवशात् लहरिकर्षणेन निवारिता एता
दृशेन करेण सापत्न्यस्फुरितनयनं नयोः स्यात्तयोः समानः पतिर्यस्याः सा सपत्नी तस्याः भावः सा

गं° ल°
२८

यत्वं येन स्फुरितेन कोपेन चंचलेन यनेन अस्मिन् कर्म्मणि प्रया भवति तया आक्षिप्ताः आकर्षिताः
केचित्तु भवान्या इति षष्ठ्यंतः पाठः तत्र भवान्याः करेण कर्तृभूतेनेत्यर्थः ८० इदानीं बहवो लोकाः त्वा
मायांति तत्र तेषामभीष्टं करोषीति कारणं वर्त्तते अहं तु स्वभावादेव त्वय्यनुरक्त इति तुभ्यं शपइत्याह
प्रपद्यंत इति भो मातः सुरधुनि कति लोकाः अत्र भवतीं पूज्यां भवतीं त्वां न प्रपद्यंते नायांति अपि
तु बहवः प्रपद्यंत इत्यर्थः तत्रायं उपाधिः कारणं स्फुरति वर्त्तते किं तदित्याकांक्षायामाह यत्तस्मा
त्कारणात् अभीष्टं वांछितं वितरसि ददासि तेभ्य इति शेषः मम तु पुनः जगन्नाथस्यात्मा स्वभावा

प्रपद्यंते लोकाः कति न भवतीमत्र भवतीमुपाधिस्तत्रायं स्फुरति यदभीष्टं वितरसि शपे
तुभ्यं मातर्म्मम तु पुनरात्मा सुरधुनि स्वभावादेव त्वय्यमितमनुरागं विधृतवान् ४१

देव निसर्गादेव त्वयि भवत्याममितं अपरिमितं अनुरागं प्रीतिं विधृतवान् धारयामास इति तुभ्यं
भवत्यै शपे शपथं करोमि श्लाघह्नुङ्स्थाशपामिति संप्रदानत्वम् ४१ इदानीं त्वदीया मृत्तिका म
दीयं समस्तशोकं दूरीकरोत्विति प्रार्थयते ललाट इति पूर्वश्लोकांते संबोधनपदं आवर्त्तनीयम्
भो सुरधुनि त्वदीया त्वत्संबंधिनी या मृत्स्ना प्रशस्ता मृत् मृत्स्नासस्नौ प्रशंसायामिति मृत्शब्दा

तस्त्रप्रत्ययः मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिकेत्यमरः मम जगन्नाथकवेः कृत्स्नामपि संपूर्णा
मपि शुचं शोकं हरतु ननु मृत्तिकायाः शोकहरणे कथं सामर्थ्यमित्याकांक्षायामाह सा कायामृत्स्ना इ
हलोके ललाटे भालदेशे सलीलं यथास्यात्तथा तिलकिता सती पुंड्रीकृता सती तमो हंतुं तरुणतरमार्त्तंड
तुलनाम् तरुणतरः माध्याह्निको यो मार्त्तंडः सूर्यः तस्य तुलनां साम्यं धत्ते बिभर्त्ति अत्र प्रमाणं तु
गंगातीरसमुद्भूतां मृदं मूर्ध्ना बिभर्त्ति यः बिभर्त्ति रूपं सोर्कस्य तमोनाशाय केवलमिति ब्रह्मांडपुराण
वचनं बोध्यम् तिलककरणप्रकारोप्युक्तस्तेनैव वामहस्ते जलं कृत्वा सावित्र्या चाभिमंत्रितम् त

ललाटे या लोकैरिह खलु सलीलं तिलकिता तमो हंतुं धत्ते तरुणतरमार्त्तंडतुलनाम्
विलुंपंती सद्यो विधिलिखितदुर्वर्णसरणिं त्वदीया सा मृत्स्ना मम हरतु कृत्स्नामपि शुचम् ४२

द्विष्णोरिति मंत्रेण मर्द्दयेन्मृत्तिकां ततः अतो देवेति सूक्तेन तिलकं कारयेत्सदेति इदं तिलककरणं प्रा
तः स्नानोत्तरं बोध्यम् पुनः सा काया विधिलिखितदुर्वर्णसरणिं विधिना ब्रह्मणा लिखिताः ते च ते
दुर्वर्णाः दुष्टाक्षराणि अयं दरिद्रो भविता मृतमार्त्यो भविष्यत्यादयः तेषां सरणिः तां सद्यः लापनाव्यव
हितोत्तरकाले एव विलुंपंतीति विशेषेण लुंपंती प्रोंछंती एवं च विधिलिखितमपि अलीकं कुर्वं
त्या मम शोकहरणे सामर्थ्यमस्तीति भावः ४२ इदानीं मूढान्नरानुपहसंतः स्ववासिभ्रमराणां मा

लिन्यदोषं दूरीकुर्वाणाश्च गंगातीरतरवः मम सखायः संत्वित्याह नरानिति त्रिदशतटिनीतीर
तरवः त्रिदशतटिन्याः गंगायाः तीरं तत्र तस्य वा तरवः वृक्षाः नः अस्माकं भक्तजनानां सखायः
मित्राणि संतु भवंतु अथ मित्रं सखा सुहृदित्यमरः कथंभूताः त्रिदशतटिनीतीरतरवः मूढान्मूर्खान्
अत एव तत्तज्जनपदसमासक्तमनसः ते च ते जनपदाश्च तत्तज्जनपदाः स्वस्वदेशाः नीवृज्जनपदे दे
श इत्यमरः तेषु समासक्तं संबद्धं एतादृशं मनो येषां ते तान् एतादृशान् नरान् मनुष्यान् विकचकु
सुमव्रातमिषतः विकचानि प्रफुल्लानि यानि कुसुमानि पुष्पाणि तेषां व्रातः समूहः तस्य तदेव वा

नरान्मूढांस्तत्तज्जनपदसमासक्तमनसो हसंतः सोल्लासं विकचकुसुमव्रातमिषतः
पुनानाः सौरभ्यैः सततमलिनो नित्यमलिनान् सखायो नः संतु त्रिदशतटिनीतीरतरवः ४३

मिषं छलं तस्मात् सोल्लासं सहर्षं यथा स्यात्तथा हसंतः उपहासं कुर्वंतः एतेषां दुष्टस्वीयस्वीयदेशार
चिताभक्त्या तत्रैव मरणेन दुर्गतिर्भविष्यति अस्माकं तु सदैव गंगातीरवासित्वाद् सद्गतिर्भविष्य
तीति तान् उपहसंतीत्युत्प्रेक्षा पुनः कथंभूताः नित्यमलिनाः नित्यं मलिनाः मालिन्ययुक्ताः तान्
जन्मतः श्यामानित्यर्थः एतादृशान् अलिनः भ्रमरान् सौरभ्यैः निजकुसुमसौगंध्यैः संततं निरंतरं य
था स्यात्तथा पुनानाः पवित्रीकुर्वाणाः एवं च तादृशान् ये पुनंति ते स्वसखं मामपि पवित्रं करिष्य
तीति भावः सौरभ्यैः नित्यमलिनान् पुनाना इति वा योजना मधुलिण्मधुपालिन इत्यमरः ४३

विशेषेण आसक्ताः ५

गंगा०
लहरी०
टी०
२६

इदानीं केचन स्वेष्टफललाभाय यमनियमादियोगं कुर्वंति अहं तु त्वन्नामस्मरणेन प्राप्तकामः सन्
जगज्जालं तृणतुल्यमन्य इत्याह यजंतीति भो त्रिपथगे एके लोकाः कठिनतरसेवान् अतिशयेन कठि
ना कठिनतरा सेवा येषां ते तान् एतादृशान् देवान् विष्ण्वादीन् यजंति पूजयंति तदपरे तेभ्यः देवपूजकेभ्यः
ये अन्ये पंचमीति योगविभागात्समासः यद्वा ते देवपूजकाः अपरे येभ्यः ते इति पंचम्यर्थे बहुव्रीहिः
देवपूजकेभ्यः उर्वरिता इत्यर्थः वितानव्यासक्ताः उल्लोचनेषु यज्ञेषु वा व्यासक्ताः तत्परा इत्यर्थः सं
तीति शेषः अस्त्री वितानमुल्लोच इत्यमरः लोके चांदवा इति प्रसिद्धिः क्रतुविस्तारयोरस्त्री वितानं त्रि
षु तुच्छके इत्यमरः कतिपये अन्ये लोकाः यमनियमरक्ताः यमनियमयोरक्ताः अनुरक्ताः संतीति शेषः

यजंत्येके देवान्कठिनतरसेवांस्तदपरे वितानव्यासक्ता यमनियमरक्ताः कतिपये अहं तु
त्वन्नामस्मरणभृतिकामस्त्रिपथगे जगज्जालं जाने जननि तृणजालेन सदृशम् ४८

कृत२

तान् कुर्वंतीत्यर्थः तत्कारणकाठिन्यात् कतिपयपदोपादानम् यमनियमग्रहणं अष्टानामप्युपलक्षणम्
तेच यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयः तत्र अहिंसादि परिग्रहो यमः शौचा
दिसंपादनं नियमः पद्मकाद्यासनं रेचकादि प्राणायामः इंद्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः
तत्रैव विच्छिद्य अंतरिंद्रियप्रवाहो ध्यानम् चित्तवृत्तिनिरोधः समाधिरिति दिक् भो त्रिपथगे जननि
त्रीन् पथो गच्छतीति त्रिपथगा यद्वा त्रयाणां पथां समाहारस्त्रिपथम् पथः संख्याव्ययादेरिति नपुं
सकत्वम् तेन गच्छतीति त्रिपथगा गमेर्डः तत्संबोधनम् अहं तु जगन्नाथस्तु त्वन्नामस्मरणे कृत

२६
गंगा०

कामः सन् तव नाम त्वन्नाम प्रत्ययोत्तरपदयोश्चेति त्वादेशः त्वन्नामस्मरणचिंतनेन तेन कृताः
संपादिताः तादृशाः कामाः मनोरथाः येन सः एतादृशः सन् जगज्जालं जगतः जालस्य समूहः
जगज्जालम् जालं समूह आनाय इत्यमरः तृणजालेन कक्षसंवेन सदृशं तुल्यं जाने वेद्मि तृ
णजालेनेति तुल्यार्थैरित्यादिना तृतीया कलौ नामोच्चारणस्यैव सारत्वात् तदेव करोमीति भावः
तदुक्तम् हरेर्नामैव नामैव नामैव मम जीवनम् कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथेति दिक्
अत्र नामशब्देन नामोच्चारणपरो बोद्धव्यः ४४ इदानीं जन्मावधि निरंतरं पुण्यवतां साधूनां मध्ये
कं तु बहवो देवाः कुशलाः संति निःशेषाणां पापिनां तु त्वां विना अन्यहितकरं जगति न पश्यामीत्याह

अविश्रांतं जन्मावधि सुकृतजन्मार्ज्जनकृतां सतां मध्ये कं तु कति न कृतिनः संति विबुधाः
निरस्तालंबानामकृतसुकृतानां तु भवतीं विनामुष्मिंल्लोके न परमवल्लोके हितकरम् ४५

अविश्रांतमिति हे त्रिपथगे जननि अविश्रांतं निरंतरं जन्मावधि जन्मप्रभृति जन्मपर्यंतं वा सुकृतज
न्मार्ज्जनकृतां सुकृतेन पुण्येन जन्मार्ज्जनं जन्मसंग्रहस्तत् कुर्वंति तेषां तादृशानां सतां साधूनां मध्ये
कं तु कल्याणं संपादयितुं कति विबुधाः कतिसंख्याका देवाः कृतिनः कुशलाः न संति अपि तु बहवः संतीत्य
र्थः निरस्तालंबानां निरस्तः गतः आलंबः आश्रयो येषां तेषां अकृतसुकृतानां तु न कृतं सुकृतं पुण्यं यैः
तेषां पापिनामित्यर्थः तेषां तु अमुष्मिंल्लोके भवतीं विना त्वां मृते वर्ज्जयित्वा परं हितकरं अभिमतसंपादकं ना
रवल्लोके न पश्यामि एतत्सर्वं चित्ते निधाय त्वामहं शरणागत इति भावः ४५

इदानीं तव जलं पीत्वा मूढमित्रैः सह विहर्तुं गतोऽहं क्वचिदपि सुखं न लब्धवान् इदानीं मृदुपवनसंबंध
शीतलस्वांके चिरकालमनिद्रं मां त्वं स्वापयेति प्रार्थ्यते पद्ये इति भो मातः तव पयः पीत्वा विमूढैः विशे
षेणामूढाः मूर्खाः विमूढास्तैः विशेषण्य ईषदपि हिताहितज्ञानशून्यत्वम् तादृशैः सहचरैः सहसाकं
चरंति मदंतीति गच्छंतीति वा ते सहचराः मित्राणि तैः सह सपदि शीघ्रं संरंतुं विहर्तुं यातः गतः गत्यर्थाकर्
मकेत्यादिना या धातोः कर्तरि क्तः एतादृशः अहं क्वचिदपि कस्मिंश्चित् स्थलेपि कस्मिंश्चित् विह
रेपि वा विश्रांति विश्रामं न अगमम् सपदि यात इति वा योजना जन्हु तव पयः सपदि पीत्वेति संबंधः
एतेन तृष्णावशात् शीघ्रं तव जलपानमात्रं कृतम् न स्नानादिकम् तेन स्वस्मिन्नपराधबाहुल्यमस्ती

पयः पीत्वा मातस्तव सपदि यातः सहचरैर्विमूढैः संरंतुं क्वचिदपि न विश्रांतिमगमम्
इदानीमुत्संगे मृदुपवनसंचारशिशिरे चिरादुन्निद्रं मां सदयहृदये शायय चिरम् ४६

ति सूचितम् भो सदयहृदये दया सहितं सदयम् तादृशं हृदयं यस्याः सा तत्संबोधनम् एतादृशि
हे मातः इदानीं संप्रति एतर्हि संप्रतीदानीमधुना सांप्रतं तथेत्यमरः मृदुपवनसंचारशिशिरे मृ
दुः कोमलः अल्प इत्यर्थः एतेन वात्याया दुःखप्रदत्वान्निरासः सूचितः मृदुश्चासौ पवनश्च तस्य सं
चारः गमनं संबंधो वा तेन शिशिरः शीतलः एतेन श्रमसंचलस्य निद्रास्थानयोग्यत्वमावेदि
तम् एतादृशे उत्संगे अंके चिरात् बहुकालं उन्निद्रं उज्झितनिद्रं यस्य सः एतादृशं मां शायय स्वापय

निद्रांकारयेत्यर्थः शीङ् स्वप्ने इति धातोर्णिजन्तात् लोण्मध्यमपुरुषैकवचनम् सिप् अतो हेः इति हेर्लुक् निद्राणाः सुखे विनिद्र बहुपक्ष लस्वप्नोऽजयगामित्वात् प्रबोजककपक नृगामित्वाभावेन णिचश्चेति आत्मनेपदं न चिरात् शायये ति वा यो जनो लोके यि मातापुत्रं अंके स्वापयति इति प्रसिद्धमेव एतदपि मेव मातरि ति संबोधनम् ४६ इदानीं मम अधारापकटिं बंधादिकं कुर्वित्याह बधानेति भो सुरधुनि जगन्नाथस्य तन्नाम्नः अयं समुद्धारसमयः सम्यगुद्धरणं समुद्धारः तस्य समयः कालः अस्तीति शेषः यद्यपि आत्मनामगुरोर्नाम नामाति कृपणस्य च श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः इति निषेधात् स्वनामग्रहणं अश्रेयस्करं भवति तथापि अत्यंतातिवधान्नागेव द्रुतिमरमणीयं परिकरं किरीटे बालेंदुं नियमय पुनः पन्नगगणैः तुरत्या निषेधोल्लंघनम् अत एव हा पितः क्वासि हे सुभ्रु वेत्येव विलापस इति भट्टिप्रयोगः संगच्छत इति दिक् ननु अस्तु तवोद्धारसमयः मया किं कर्तव्यमित्याकांक्षायामाह बधानेति त्वं द्रुतिमरमणीयं अतिशयेन द्रुतः इति द्रुतिमा वर्णदृढादिभ्यः ष्यञ्चेति चादिमनिच् र ऋतो हलादेर्लघोरिति ऋकारस्य रकारः द्रुतिमा चासौ रमणीयश्च तम् अतिशयेन सुंदरं चेत्यर्थः एतादृशं परिकरं कटिं शाकं श्रीघ्रं बधान बध बंधने भवेत परिकरो ब्रातेपर्यंक परिवारयोः प्रगाढगात्रिक बंधे विवेकारंभयोरपीति विश्वः ममोद्धाराय शीघ्रं कटिं बंधं कुर्विति भावः पुनस्त्वं किरीटे मुकुटे अथ मुकुटं कि

रघु० टी० ७ ५८

बालेंदुं बालश्चासौ इंदुश्चेति कलात्मकं चंद्रं पन्नगगणैः पन्नं पतितं गच्छंतीति ते पन्नगाः सर्पाः तेषां ग
णाः समूहाः तैः नियमय नियमनं कुरु तत्रैव स्थापयेत्यर्थः अन्यथा ममागमनसमये पतिष्यतीति भा
वः लोकेऽपि कश्चन मनुष्यः कस्यचिद्व्याघ्रादिपीडितस्य जनमोचनं करोति तदा कृं वेधक्षिरोभूषणादि
कं हठे करोतीति प्रसिद्धम् जटाकिरीटे पन्नगगणैः बालेंदुं नियमयेति योजना पुनः त्वं इतरजनसाधारण
तया इतरः अन्यः नीचो वा इतरस्त्वन्यनीचयोरित्यमरः सचासौ लोकश्च जनश्चेति तेन साधारणः तुल्यः त
स्य भावः साधारणता तया हेला अवज्ञां मम अनादरं न कुर्वीथाः मा कुर्वित्यर्थः परमतत्त्वज्ञे मयि अन्यज
नतुल्योऽयमिति बुद्धिं मा कुर्विति भावः अत्र लोकोक्त्यलंकारः तदुक्तं कुवलयानंदे लोकप्रवादानुकृतिर्लो

न कुर्वीथास्त्वं चेद्धेलामितरजनसाधारणतया जगन्नाथस्यायं सुरधुनि समुद्धारसमयः ४७
शरच्चंद्रश्वेतां शशिशकलश्वेतालमुकुटां करैः कुंभांभोजे वरभयनिरासौ च दधतीम्

कोक्तिरिति भणनादिति ४७ इदानीं गंगारूपं स्तौति शरदिति भो सुरधुनि ये जनाः त्वां ध्यायंति चिंतयंति
तेषां जनानां परिभवः अनादरः अनादरः परिभवः परिभावस्तिरस्क्रियेत्यमरः न उदयति उत्पन्नो न भ
वतीत्यर्थः यद्यपि अयगताविति धातुरात्मनेपदं तथापि इटकिटकटीत्यत्र प्रश्लिष्टस्य ईधातोरुत पूर्व
स्येदं रूपं बोध्यम् अत एव उदयति विततोर्ध्वरश्मिरज्जाविति माघप्रयोगः संगच्छत इति दिक् कथंभूतां
त्वाम् शरच्चंद्रश्वेताम् शरदि शरत् शरत्काले अयप्रारंतस्त्रियामित्यमरः तत्र यश्चंद्रस्तद्वत् श्वेता शुभ्राम्
परमगौरामित्यर्थः शरदित्यनेन परमनैर्मल्यं सूचितम् पुनः कथंभूताम् शशिशकलश्वेतालमुकुटाम्

अलतिदंशं कुर्वन् गच्छतीत्यलः सर्पः श्वेतश्चासौ अलश्च श्वेतालः शुभ्रसर्पः शशिनश्चन्द्रस्य शक-
लः खंडः शशिशकलः शशिशकलश्च श्वेतालश्च शशिशकलश्वेतालौ तौ मुकुटे यस्याः सा ताम् यद्वा
श्वेताश्च ते अलाश्च भूषणानि च श्वेतालाः यद्वा श्वेतस्य रजतस्य अलाः भूषणानि दुर्वर्णं रजतं रूप्यं ख-
र्जूरं श्वेतमित्यपीत्यमरः गमन भूषणार्थकादलधातोः पचाद्यच् शेषसमासाः पूर्ववत् यद्वा शशिश-
कलश्वेतालः तादृशो मुकुटो यस्याः सा ताम् यद्वा शशिशकले श्वेतालइव शुभ्रभूषणमिवेति व्याघ्रादि-
त्वादुपमितसमासः शशिशकलश्वेतालः तादृशो मुकुटो यस्याः सा ताम् यद्वा शशिशकलश्वेतः श्वेत

सुधाधाराकाराभरणावसनां शुभ्रमकरस्थितां त्वां ये ध्यायन्त्युदयति न तेषां परिभवः ॥ ४८

गुणः तं आसमन्तात् लातीति शशिशकलश्वेतालः तादृशो मुकुटो यस्याः सा ताम् यन्मुकुटे चन्द्रस्य प्रभा
प्रसृता भवतीति भावः ला दाने इति धातोः आतश्चोपसर्गे इति कः गुणे शुक्लादयः पुंसीत्यमरः यद्वा शशि-
शकलं च श्वेतश्च शशिशकलश्वेतौ श्वेतो रजतं तौ आसमन्तात् लातीति शशिशकलश्वेतालः तादृशो
मुकुटो यस्याः सा ताम् यस्याः रौप्यमुकुटे शशिशकलं वर्त्तते इत्यर्थः ग्रन्थविस्तारभयान्न लिख्यते
पुनः कथंभूता करैः चतुर्भिः हस्तैः कुंभांभोजे कुंभश्च अंभोजं च कुंभांभोजे कुंभो घटः अंभोजं कमलं
ते वरभयनिरासौ च भयस्य निरासः नाशः अभयमित्यर्थः वरश्च भयनिरासश्च वरभयनिरासौ तौ
च दधती बिभ्रती चतुर्भिर्हस्तैरिमानि चत्वारि दधतीति भावः पुनः कथंभूतां त्वाम् सुधाधाराकाराभरणा

सुधायाः अमृतस्य धारा आभरणानि च वसनं च आभरणानि भूषणानि वसनं वस्त्रम् अलंकार
स्त्वाभरणं परिष्कारो विभूषणम् वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकमित्यमरः सुधाधार एव
आकाररूपं येषां तानि सुधाधाराकाराणि तादृशानि आभरणवसनानि यस्याः सा ताम् अतिशु
भ्राभरणवसनामित्यर्थः पुनः कथंभूतां त्वाम् शुभ्रमकरस्थितां शुभ्रश्चासौ मकरश्च शुभ्रमकरः
मकरो मत्स्यः तत्र स्थिता ताम् शुभ्रमत्स्यवाहिनीमित्यर्थः ॥४७॥ इदानीं गंगा मम शरीरसुखं करोत्वि
त्याह दरस्मितेति शंतनोः भीष्मपितुः अंगना कल्याणानि अंगनानि यस्याः सा अंगना अंगात्
कल्याणे इति पामाद्यंतर्गणसूत्रेण अंगशब्दान्नप्रत्ययः श्रीगंगा मम जगन्नाथपंडितस्य तनोः शरीरं

दरस्मितसमुल्लसद्वदनकांतिपूरामृतैर्भवज्वलनभर्जितानिशमूर्जयंती नरान्
चिदेकमयचंद्रिकाचयचमत्कृतिं तन्वती तनोतु मम शंतनोः सपदि शंतनोरंगना ॥४८॥

स्य ङि इति ह्रस्वश्चेति वैकल्पिकत्वात् विसंज्ञाभावे गुणः शं सुखं सपदि शीघ्रं तनोतु विस्तारयतु प्रार्थ
नायां लोट् कथंभूता अंगना दरस्मितसमुल्लसद्वदनकांतिपूरामृतैः दरं ईषत् तच्च तत्स्मितं च दर
स्मितं तेन समुल्लसत् विकासमानं तच्च तद्वदनं च तस्य कांतिः छविः तस्याः पूरः आधिक्यानि त एव
वामृतानि तैः भवज्वलनेन भर्जितान् भव एव संसार एव ज्वलनः अग्निः तेन तत्र वा भर्जिता दग्धा
स्तान् एतादृशान् नरान् मनुष्यान् अनिशं सर्वदा ऊर्जयंती जीवयंती पुनः भवस्य महादेवस्य

तत्र भवएव व्यालः सर्पः तेनावलीढः तादृशस्यालापस्य सततस्येति व्याख्येयम ननु तादृशतापनिवारणेमं
त्वादृशो बहवः संतीति चेत्तेपि न शक्ता इत्याह मंत्रैरित्यादि मंत्रैर्मीलितं साहसेन तापनिवारणाभावात्सं
कुचितं तत्र सर्पः अत्र हेतुः सर्वत्र पूर्वार्द्धे योज्यः बहुवचनं तु एकोपि न समर्थ इति बोधनाय एवमग्रेपि
बोध्यम यद्वा यत्र बहुभिः संकुचितं तत्र एकस्य का वार्तेत्यर्थबोधनाय औषधैस्तापनिवारणाय प्रयोगेऽपि
वैयर्थ्यात् अप्रसिद्धैः मुकुलितं मुकुलीभावमापन्नं सुराणां देवानां संघैः त्रस्तं त्रासं गतं सांद्रसुधारसैः सा
न्द्राः निबिडाः ते च ते सुधारसाश्चेति अमृतजलैः रसो जलं रसो हर्ष इत्यनेकार्थकोशः स्वस्तं अधःपति
तम् स्वस्य अधःपतने पदत्वाभावात् वसुस्वंस्विति दलनेन गारुत्मतैः गरुत्मान् गरुडः गरुत्मान् गरु

वीचीक्षालितकालियाहितपदे स्वर्लोककल्लोलिनी त्वं तापं निरसाधुना मम भवव्या
लावलीढात्मनः ५०

डस्तार्क्ष्य इत्यमरः देवता एषां ते गारुत्मताः तैः सास्य देवतेत्यण् यद्वा गरुत्मतः इमे गारुत्मताः तैः
तस्येदमित्यण् एतादृशैः ग्रावभिः पाषाणैः पाषाणप्रस्तरग्रावोपलाश्मानः शिलादृषदित्यम
रः विदलितं विशेषेण दलितं स्फुटितं विशेषस्य खंडखंडभवनम् अत्र सर्वत्र पूर्वार्द्धे नपुंसके भा
वे क्तः अत एव कर्त्तुरनभिहितत्वात् मंत्रैरित्यादिषु कर्त्तरि तृतीया अत्र श्लोके शार्दूलविक्रीडितम्
म्सौ ज्सौ तौ गादित्य ऋषयः इति लक्षणात् ५० इदानीं गंगालहरीं नरवटीतांडवं अस्मान् पुना
त्विति प्रार्थयते पूतइति भोः स्वर्लोककल्लोलिनि तव भवत्याः व्यालोलोल्लासिवल्गल्लहरि

तृतीयनेत्राग्निः तेनतत्रवामज्ज्वालितान एवंचतादृशोकृत्यंकुर्वत्याममवपुः सुखकरस्तोनकोप्या
यासइतिभावः पुनःकथंभूता अंगना विदिकमयंचंद्रिकाचय चमत्कृतिम विदिकमयीचित
स्वरूपाचासौचंद्रिकाकौमुदीच चंद्रिकाकौमुदीज्योत्स्ना इत्यमरः तस्याःचयः समूहः त
स्यचमत्कृतिः चमत्कारः तांतन्वती तनोतीतितन्वती विस्तारयंती तनोतेः शतृप्रत्ययेने
कचंद्रप्रकाशंस्वयमेवकरोतीतिभावः अस्मिन्लोकेपृथ्वीछंदः जसौजसयलावसुग्रहयति
श्चपृथ्वीगुरुरितिलक्षणात ८८ इदानींसंसारज्वालानिर्दग्धवपुषोममतापंनाशयेत्याह
मंत्रैरिति वीचीक्षालित कालिमाहितपदे कालियस्याहितःशत्रुःकालियाहितः विष्णुः

मंत्रैर्मीलितमोषधैर्विगलितं त्रस्तं सुरांगनैः स्वस्तं सांद्रसुधारसैर्विदलि
तंगारुत्मतैर्ग्रावभिः वीचीक्षालितकालियाहितपदंयन्नाहितंत्रय्यी

तस्यपदंचरणः वीच्याक्षालितंप्रक्षालितंवीचीक्षालितं स्वर्लोकसमुल्लो
त विष्णुनाप्यापितंतच्चतत्पदंच शेषंप्राग्वत हेस्वर्लोककल्लोलिनि
कस्यकल्लोलिनीनदीतस्याः संबोधनम त्वंअधुना भवज्वालावलीढात्मनः भवस्यज्वालाः ता
भिः अवलीढः कवलितः आप्तइत्यर्थः तादृशः आत्मा यस्यतस्यममतापंतिरयनिवारय
तिरयेतिपाठः तत्रतिरःकुरु तिरःशब्दात णिज तल्लोट अव्ययानांभमात्रेटिलोपः इतिति

व्यालोलाश्चंचलाः उल्लासिन्यः ऊर्ध्वं उच्छलंत्यः वल्गंत्यः गच्छंत्यः एतादृश्यो लहर्यः ता
एव नटस्तस्य वटी तांडवं शिरसि वटीं धृत्वा नर्त्तनम्, यद्वा नटस्य वटी तांडवं नटवटीतांडवम् व्या
लोलोल्लासिवल्गल्लहरीणां नटवटीतांडवं तत् नः अस्मान् भक्तजनान् पुनातु पवित्रीकरोतु
व्यालोलादिविशेषणविशिष्टलहरीभवने मूलमाह कथंभूतायास्तव द्यूते दुरोदरे परस्परजि
गीषयाक्षैः क्रीडनं द्यूतं तत्र अत्र विजिगीषायाः सत्वात् दिवो विजिगीषायामित्यनेन निष्पात
स्पन्नत्वेन नागेंद्रकृत्तिप्रमथगणमणिश्रेणिनंदींदुमुख्यम् नागेंद्रो वासुकिः कृत्तिर्गजादिचर्म प्र
मथगणाः तन्नामकाः पारिषदाः मणिश्रेणीः मणीनां हृद्यत्वादि मणीनां श्रेणीः पंक्तिः नंदिः स्व

द्यूते नागेंद्रकृत्तिप्रमथगणमणिश्रेणिनंदींदुमुख्यं सर्वस्वं हारयित्वा स्वमथपुरभिदि
छद्मपणीकर्त्तुकामे साकूतं हैमवत्या मृदुलहसितया वीक्षितायास्तवांब व्यालो
लोल्लासिवल्गल्लहरिनटवटीतांडवं नः पुनातु ५१

वाहनभूतो वृषभः इंदुः स्वशिरोभूषणभूतः चंद्रः एतेषां इतरेतरयोगद्वंद्वः नागेंद्रकृत्तिप्रमथगण
मणिश्रेणीनंदींदवः मुख्याः श्रेष्ठाः यस्मिन् तत् एतादृशं सर्वस्वं सर्वं च तत् स्वं च सर्वस्वं धनं हारयि
त्वा शिवसकाशात् पार्वती गृहीत्वा हारयित्वेत्यत्र णिजंतात् क्त्वा अत्र प्रयोजककर्तृत्वं पार्वत्याः प्रयोज्य
कर्तृत्वं शिवस्य अतएव समानकर्तृकयोः पूर्वकाले इत्यनेन क्त्वासुलभः वीक्षणकर्तृकर्तृत्वाहरणामि

ना॰ मितिः

महि॰ टी॰ निबोधः प्रकृतमनुसरामः अथ सर्वस्वहरणानन्तरं पुरभिदि पुरनामानं दैत्यं भिनत्ति विदारय
टी॰ तीति पुरभित् तस्मिन् शिवे स्वमात्मानं पणीकर्त्तुकामे सति पणनं व्यवहरणं पणः ग्लहेऽर्थे कवि
धानेकः अथ पणः पणः यथा संपद्यते तथा कर्त्तुमिति पणीकर्त्तुकामः इच्छा पपयसः तस्मिन्
३१ लुपेदवश्यमः कृत्ये तुकाममनसोरपि समो वा हित ततयो मांसस्य पचि युट् घञोरिति पृषोदरादि
गणपठित वचनेन कर्त्तुमिति मकारलोपः तादृशे सति मृदुलं हसितं हास्यं यस्याः सा तया इदानीं सप
त्नीभूत गंगया याचनेन श्रेष्ठ सिद्धिर्भविष्यतीत्याशयेन हसिता एतादृश्या हैमवत्या हिमवतो हि
माचलस्यापत्यं स्त्री हैमवती तस्यापत्यमित्यण् टिड्ढाणञिति ङीप् तया पार्वत्या साकूतम् आकू

विभूषिताऽनेगरिपूत्तमांगा सद्यः कृताऽनेककजङ्गाभिर्गंगा मनोहारोऽतुगवलतरंगा
गंगा नमंगा गन्यनलीकरोतु ५२

तेनाभिप्रायेण सहितं साकूतं तथया
स्यात्तथा वीक्षिता याः विशेषेणोक्षिता वीक्षिता तस्याः विशेषबद्धजटाजूटस्थितया द्रष्टुमशक्यया
अपि पत्नीतो दर्शनव्यापारवत्त्वम् अपि च शिवस्य पूर्वोक्तं सर्वस्वमपाहृतम् अत एव शिवः आत्मानं
५४ पणीकरोति तथा गंगा तु उपरि तावत्तिते सा च सपत्नीभूतत्वात् मामवमत्य एतावत्कालपर्यन्तं शिवशि
रसि स्थिता वर्त्तते इदानीं याचयित्वा दासीं संपादनी येति साकूतमित्यस्यार्थ इति दिक् नर्त्तनप्रियस्य
शिवस्य द्यूतं विस्मारयितुं गंगया नृत्यमारब्धमिति दिक् हैमवती त्वनेन कठिनहृदयत्वात्तेन सर्व
स्वहरणे योग्यत्वम् अस्मिन् श्लोके स्रग्धरावृत्तम् स्रग्धरा म्रौ म्नौ

३१

इदानीं चरमश्लोकेन स्वांगान्यमलीकरणं प्रार्थयते विभूषितेति गंगा भागीरथी गंगार्थिना दस्तु स्मृ
तं सद्य इत्याद्यमश्लोके उक्तः मम जगन्नाथस्यांगान्यमलीकरोत्वित्यर्थः कथंभूता गंगा विभूषितानं
गरिपूत्तमांगा अनंगस्य कामस्य रिपुर्वैरी शिवः तस्योत्तमांगं मस्तकं विभूषितं स्वस्थित्या शोभायुक्तं कृतम्
अनंगरिपूत्तमांगं यया सा पुनः कथंभूता सद्यः तत्कालमेव कृतानेकजनार्त्तिभंगा अनेके च ते जना
श्च तेषामार्त्तिः पीडा तस्याः भंगः नाशः कृतः संपादितः अनेकजनार्त्तिभंगो यया सा यद्वा जनानां
आर्त्तयः पीडाः अनेकाश्च ता जनार्त्तयश्च तासां भंगः अनेकजनार्त्तिभंगो यया सा सद्यः कृतानेकज
नार्त्तिभंगेत्येकं पदं वा पुनः कथंभूता मनोहरोत्तुंगचलत्तरंगा मनोहरा अतिरमणीयाः उत्तुंगाः उन्न

विभूषितानंगरिपूत्तमांगा सद्यः कृतानेकजनार्त्तिभंगा मनोहरोत्तुंगचलत्तरंगा गंगा ममांगान्यमलीकरोतु ५२ इमां पीयूषलहरीं जगन्नाथेन निर्म्मिताम् यः पठेत्तस्य सर्वत्र जायंते सुखसंपदः ५३

ताः चलंतः चंचलाः तरंगाः यस्याः सा अस्मिन्पद्ये उपजातिनामकं वृत्तं इंद्रवज्रा तो जौ
ग उपेंद्रवज्रा जो जौ ग अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति लक्षणात् ५२
स्वकाव्यपठनस्य फलमाह इमामिति पीयूषस्यामृतस्य लहरीं त्वां यया पीतामृतलहर्य्या आनंदजन
कत्वं तया तुल्या अपीति शेषः अन्यकृतिभ्रमवारणायाह जगन्नाथेन निर्म्मितामिति निर्म्मितां कृताम्
शेषं सुगमं शिवम् ५३ यद्यप्यहं मंदमतिस्तथापि टीकासमाप्तिर्हि बभूव शीघ्रम् नात्रापरं कारणमस्ति
किंचिच्छ्रीभास्कराज्ञा किल किं त्वमोघा १ शाके कीलकसंज्ञके नृसुखके संमासके चैत्रके वारे भार्गवके

तिथ्योकरणके सर्पस्पृष्टंबालके मूलेमेविबुधौघचित्तसुखदा टीकासमाप्तानया तोषंयातु समस्त
पापहारिणीगंगामहेशाङ्गना २ नृपंद्विपंवातुरगंमृगंवाभ्रुकंवकंवामहिषंवृषंवा हरीकरोत्यघगनकं
हिगंगेस्नातंभवत्यासकृदीशसंगे ३ नारायणोयस्यपितामहोभून्नरसीकभट्टस्यपितातदीयः गोपी
यदीयाजननीसुशीला टीकाकृतातेनसदाशिवेन ४ भक्तोपोऽहमहेतोः केदारत्वं स्थितोसिभूभृति किं
तत्राप्यागत्यत्वांस्वशिवेवाचेहितत्सर्वम् ५ सदाशिवकृतटीकासमाप्ता ० श्रीगंगादेव्यैनमः [illegible]

